कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 277. विषय पुराण

नाव. नासिकेतोपाख्यान (मुद्रित)

लेखक/लिपीकार —

पृष्ठ 29 काळ संवत 1937 पूर्ण/~~अपूर्ण~~

अथनासकेतपुराणप्रारम्भः ॥ ॥

ना०के श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरयेत् १ षडशीतिसहस्राणिमु
१ नयःपुरानैमिषारण्येद्वादशवार्षिकेमखेक्र- तौसमुपविष्टावभूवुस्तैरेवसूतःपौराणिकोहृष्टःस्तेहृष्ट्वाहर्षिताःस्वर्गनरका
दीनिकर्माणिचपृच्छंतिस्मेतिसंबंधः सूतउवाच गंगातीरेसुखासीनंकृत्वास्नानमलंकृतः प्रददौसनदादानंद्विजेभ्यो
जनमेजयः १ प्रायश्चित्तविशुद्ध्यर्थंदीक्षांद्वादशवार्षिकीं भ्रातृभिःसहधर्मात्माऋषिभिर्ब्राह्मणैःसह। २ उपगम्यम
हातेजावैशंपायनमब्रवीत् ३ जनमेजयउवाच पृच्छामित्वांमहाभागसर्वशास्त्रविशारदव्यासशिष्यमहायोगि।
न्सर्वज्ञोसिविदांवरः ४ कथयस्वकथांदिव्यांसर्वपापप्रनाशिनीं यांश्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ५ ॥
इहलोकेपरेवापिकथंसौख्यमवाप्यते कोलोकोधर्मयुक्तानांपापिनामपिसर्वदा ६ कीदृशोयममार्गश्चस्वर्गमार्ग
श्चकीदृशः एतत्सर्वंविशेषेणकथयस्वममानघः ७ वैशंपायनउवाच शृणुराजन्कथांदिव्यांसर्वपापप्रनाशिनीं
यांश्रुत्वाधर्ममाप्नोतिपापान्मुच्येन्नसंशयः ८ कश्चिदासीत्पुराराजन्नृषिःपरमधार्मिकः उद्दालकइतिख्यातोब्रह्मपु
त्रस्तपोनिधिः ९ वेदवेदांगतत्त्वज्ञःस्मृतिसिद्धांतपारगः दानदक्षोमुनिश्रेष्ठोमहाप्राज्ञोमहातपाः १० तस्याश्रमःसदारम्
म्योदेवर्षिमुनिसेवितः नानाद्रुमलताकीर्णोनानापुष्पोपशोभितः ११ हंससारससंकीर्णश्चक्रवाकोपशोभितःसव्यमानः

खगानीकैः सदैवातिथिसंकुलः १२ कदाचिदागतस्तत्रपिप्पलादोमहामुनिः तमागतमभिप्रेक्ष्यमुनिरुद्दालकोमुदा १३
अभिवाद्ययथान्यायमासनेचोपवेशितः पाद्यार्घंचमनीयैस्तंपूजांचक्रेतपोधनः १४ उवाचवाक्यंसमुनिःपिप्पलादंसु
खोषितं १५ उद्दालकउवाच पावितोस्मिमहाभागभवतागमनेनहि किंचिद्वाज्ञापयविभोपूर्णोस्मिकरवामकिं १६
पिप्पलादउवाच उद्दालकमहाभागश्रूयतांपरमंवचः दृष्टाश्चैवमयासर्वेमुनयश्चतपोधनाः १७ तीव्रेणतपसायुक्ताः सं
यमेनसमन्विताः सपत्नीकाः सपुत्राश्चस्वाश्रमेतपसिस्थिताः १८ स्ववंशधारणांकृत्वासाधयंतिपरंतपः वंशेनश्रेयमु।
निश्रेष्ठसर्वमेवविनश्यति १९ पितरोदेवतास्तेषांहविर्दत्तंनगृण्हते तुष्यंतिपितरोदेवायस्यपुत्रःसुशोधनः २० कुलं
तारयतेसर्वंसपुत्रोवंशवर्द्धनः अपुत्रेणागृहंशून्यंअपुत्रेणागृहेणकिं २१ अपुत्रेवंशनाशोस्तिश्रुतिरेषासनातनी त
स्मात्सर्वप्रयत्नेनपुत्रमुत्पादयेन्नरः २२ याचस्वकांचिद्राजानंकन्यार्थंत्वंमहामुने ममवाक्यात्कलत्रंहिकृत्वासुतमवा
प्स्यसि २३ त्वयापुष्यन्मुनिश्रेष्ठकर्त्तव्यासंततिःस्थितिः २४ उद्दालकउवाच षडशीतिसहस्राणिवर्षाणितपसिस्थितः
पिप्पलादकथंसोहंपुनरेवप्रवर्त्तये २५ तथैवनरकेघोरेगच्छंतिवैदिकीश्रुतिः कृत्वापवासंलोभाद्येविकलेंद्रियचेतसः
२६ गृहीत्वाव्रतंविप्रर्षेकथंतत्सगान्निवर्त्तये पिप्पलादउवाच असंततीनामूढानांतेषांधर्मोनविद्यते २७ मर्षिचमु

ना॰वो॰ ख्यामुनयोव्रतवंतःश्रुतास्त्वया॰ ऋतुकालाभिगमनात्सुखसंततिहेतवे २८ ननेषांजायतेदोषइतिस्वायंभुवोब्रवीत् एवमु
२ क्तागतस्तंतुपिप्पलादोमहामुनिः उद्दालकंनमस्कृत्यसचात्मीयाश्रमंगतः ३० वैशंपायनउवाच एवंराजन्पुराकृत्वात
पोविघ्नमुपस्थित उद्दालकोदुःखसंतप्तश्चिंतयामाससंततिं ३१ कथंलभेयभार्यांवैकथंवंशंकरोम्यहं कथामिकस्मा
द्याचामिचिंतयाद्दुःखितोभवत् ३२ पुनःसचिंतयायुक्तोब्रह्माणंशरणंययौसदास्यतिचमेभार्यांश्रेष्ठांवंशधरांशुभां ३३
सएवमुक्त्वावचनंप्र यातोब्रह्मणोंतिकं प्रजापतिंनमस्कृत्यतत्स्थौतत्रसमाधि मान् ३४ एकांतेसस्थितंदृष्ट्वातंमुनिंस
पितामहःध्यायंतंचमुनिश्रेष्ठ मुवाचवचनंविधिः ३५ ब्रह्मोवाच स्वागतंतेमुनिश्रेष्ठतपसाविद्ययान्वितः विमुक्तसर्वपापे
भ्योजितक्रोधोजितेंद्रियः किमर्थमिहसंप्राप्तःकारणंवदसुव्रत ३६ प्रजापतिवचःश्रुत्वाप्रत्युवाचमुनिर्वचःकृतांजलिपु
टोभूत्वापूर्णकामंपितामहं ३७ उद्दालकउवाच संतानार्थमिहायातोदेवदर्शनलालसः कथंचसंततिर्ब्रह्मन्भ
विष्यतिगतिप्रदा ३८ त्वंगतिःसर्वलोकानामिहलोकेपरत्रच ब्रह्मोवाच भविष्यतिचतेपुत्रोयोसौवंशविवर्द्धनः ३९ पुत्र
प्राप्तिश्चप्रथमंपश्चाद्भार्याभविष्यति सर्वलक्षणसंपूर्णारघुवंशस्यसुंदरी ४० नयातेवर्द्धतेगोत्रंममवाक्यंनचान्यथा
गच्छत्वमाश्रमंविप्रसत्यंवाक्यंनमेवृथा ४१ मिथ्याप्रतीतिःसुमृशंचिंतयन्ब्रह्मणोवचः विनाभार्यांकथंपुत्रोभविष्यतिचतं

शक्रुत् अप्रतीतमिदंश्रुत्वाजगामचपुनर्गृहं ४२ इतिनासिकेतोपाख्यानेउद्दालकचिंताप्राप्तिर्नामप्रथमोध्यायः १ वैशंपायन
उवाच इतिश्रुत्वाविधेर्वाक्यंमुनिरुद्दालकःपुनः चिंतयामासमनसिब्रह्मवाक्यमकल्मषं १ कथंपुत्रोममभवेत्कथंभार्या
भविष्यति कोदास्यतिचमेकन्यांविनाभार्यांकुतःसुखं २ इत्थंसंध्यायतेभार्यांपुत्रंचतपसिस्थितः भार्याध्यानपरोनित्यंनान्य
त्किंचिद्विचिंतयत् ३ तस्यैवंविधियोगेनस्त्रीध्यानेननराधिप अज्ञानमेवसुस्रावपद्माद्रागतचेतसः ४ सतद्गृहीत्वावीर्यंच
पद्ममध्येनिवेश्यच कुशैर्मुखंवेष्टयित्वागंगामध्येविनिक्षिपेत् ५ प्राजायत्येनयोगेनततीरमनुगच्छति अथगंगातटेतत्र
रघुराजपुरीस्थिता ६ तत्रसौधगृहेरम्येविशालेराजकन्यकारघोःपत्नीनिवसतिनाम्नाचंद्रवतीशुभा ७ तप्तकांचनवर्णा
भासुरूपादीप्तितेजसा नदेवीनचगंधर्वानासुरीनाप्सराकचित् ८ प्रवालमिवाधरस्तस्यानीलेंदीवरलोचना सुचारुचंद्रवद
नातथैवमुनिकन्यका ९ विद्याधर्योनकिन्नर्योब्रह्मपुत्रीचसास्थिता नेदृग्रूपवतीकन्यात्रिषुलोकेषुविद्यते १० मेरु
शृंगनिभाकारप्रासादस्योपरिस्थिता तत्रसारमतेकन्यासुरूपातीवशोभना ११ कन्यादशसहस्रेणसासेव्यतेसानृपात्मजा
उर्वशीचततोराजन्नवनितानांबहुश्रुता १२ तस्याःरंभादयःसर्वाःकलानांहेतिषोडशीं ब्रह्मणासापितस्यार्थेनिर्मिताकार
णेनतु १३ निर्मितंविधिसंयोगंयथास्याद्विहितंपुरा नातिक्रमतितत्कश्चिद्विधिनालिखितंपुरा १४ व्यतीतायांचत्रेतायां

ना॰के॰ द्वापरे समुपस्थिते तपोवेदधराविप्राःसम्यग्व्रतपरायणाः २५ राजानःकुलसंपन्नाःप्रजापालाःसुधार्मिकाः वैश्यावृत्तिपरास
३ वैश्शूद्राःसेवापरायणाः २६ सुभिक्षंक्षेममारोग्यंकालेवर्षतिवासवः दीर्घायुषःप्रजाःसर्वानिरुजानिरुपद्रवाः २७ रक्षितार
श्चविक्रांताधार्मिकाःक्षत्रवंशजाः तस्यपत्नीमहाराज्ञपुष्करायतलोचना २८ सुखिनीव्रतिनीसाचसर्वालंकारभूषिता
नित्यंगंगापदास्नातितदाभोज्यंभुनक्तिसा २९ स्नानार्थंनिर्गतासाचयानारूढासुशोभना निर्गताःकन्यकाःसर्वाहारकुंडल
धराःशुभाः २० सर्वास्तुरंगमारूढाध्वजचामरशोभिताः स्त्रियोनपुरुषास्तत्रगता नादूरंदिशोदश २१ महाडुंदुभिशब्दे
नकन्यावाद्यधरास्तदाकुर्वाणा अग्रतोयांतिपुरुषंननिरीक्षते २२ गंगायांस्नातुमायातारथोःकन्याव्रतेस्थिताक्रीड
तेसातटेरम्येसखीभिर्ब्रह्मचारिणी २३ सर्वलक्षणासंपन्नारूपेणोद्योतकारिणी दूरादपश्यत्साकन्यागंगामध्येस
मागतं २४ । दिव्यसौगंधिकंपद्मंतरंतंजलमध्यगं नतत्रक्रमतेसूर्योनचंद्रग्रहतारकाः २५ स्पर्शंतिचनमनुष्यास्तत्पद्म
विमलंशुभं पुरतोवेष्टितंदर्भैर्दृष्ट्वाविस्मयमागता २६ आज्ञापयत्कन्यकांसातदानय सुशोभनंआनीतंवेधजंपद्मगुल्का
मध्येतुकन्यका २७ आघ्रातमंतर्बीजंतत्त्वविष्टंनाभिमंडले स्नात्वागत्वास्थितावेश्मकन्याभिःपरिवेष्टिता २८ मासे
तुप्रथमेकन्याविनिवर्तितशोणिताद्वितीयेचतृतीयेचशरीरंविपुलायते २९ चतुर्थेमासिसंप्राप्ते उदरंदीर्घरूपितारोमराः॥

जीतरंगाणिसत्तैनौपृथुंसन्तांगतौ ३० संभूतमुदरंदीर्घमासेषष्ठेचसप्तमे दृष्ट्वासाचोदरंकन्याजाताचिंताकुलेक्षणा ३१ उ।
द्विग्नहृदयासावैपतिताशोकसागरे रोदमानांतुदुःखार्त्तांभीताःपृच्छंतिकन्यकाः ३२ कन्याऊचुः किमर्थंरोदिषिसुभ्रेक
थयस्वयथातथं तासांतद्वचनंश्रुत्वारोदमानाब्रवीत्तदा ३३ कन्योवाच इदंचैवाद्भुतंदुःखंप्रवक्ष्यामिकथंहिवः वाङ्
जावीरजाताचकुलेस्मिन्कीर्तिवर्द्धिनी ३४ अकीर्तिस्त्वमहंप्राप्तारघुवंशस्यदूषिणी नदेवानचगंधर्वानासुरानचराक्षसाः
३५ नपुनर्मानुषाणांहिदृष्टिगोचरंसंस्थिता अद्भुतंगर्भउत्पन्नोजनानांमिंदितोमम ३६ तस्यास्तद्वचनंश्रुत्वाविह्व।
लास्ताभयान्विताः तदैवकन्यकाःसर्वागताराज्ञीनिवेशने ३७ पुरःस्थित्वाचतास्तस्याःकन्याविज्ञापयंतिताः कृता।
जलिपुटाभूत्वासर्वाकन्याविलप्यतांविज्ञप्तिंकन्यकाश्चक्रुरभयंदेविदीयतां ३८ राज्ञ्युवाच युष्माकमभयंदत्तंब्रूतकन्या
यथार्थवत् महाराज्ञीवचःश्रुत्वाकन्यावचनमब्रुवन् ४० कन्याऊचुः अद्भुतंकथ्यतेदेवीमहाजंरोमहर्षणं नदेवा
नचगंधर्वानासुरानचकिन्नराः ४१ ।किंपुनर्मानुषाल्लोकेअगम्यासादुरासदा तत्रस्यापोदैवयोगाद्दुहितुर्गर्भसंभवः
४२ ततासावचनंश्रुत्वाअद्भुतंरोमहर्षणं साराज्ञीदुःखसंतप्तापतिताधरणीतले ४३ विकलानष्टचित्ताचमूर्छितासो
कविह्वलाउत्थिताचमहीपृष्ठात्तास्ताःकन्याभयान्विता ४४ प्रेषितास्त्वालयेसर्वाराज्ञीसान्त्विताहतदा गताराजसमीपंवैवच

ना°के नेचेदमब्रवीत् ४५ राज्ञ्युवाच महाराजनमस्तेस्तुसर्वधर्मविशारद अभयंदेहिमेकिंचिद्ब्रुवंतेवदाम्यहं ४६ राजोवाच ब्रूहिभद्रे।
४ ऽभयंतेद्यभयंक्कापिनविद्यते यथान्याय्यंयथायोग्यंयथाशास्त्रंकिमद्भुतं ४७ राज्ञ्युवाच त्वांनमंतिमहाराजविज्ञप्तिंशृणु
भूभुजः सुतायाश्चद्रवत्यास्तेद्यकस्माद्गर्भसंभवः ४८ नजानेहेतुमद्याहमन्यंनंकुलदूषणंतस्यास्तद्वचनंश्रुत्वारुक्मास्तः
कोपसंप्लुतः ४९ आज्ञापयामासदूतंनीत्यजनंतादूषिणींवने धर्माचारविहीनांवैकुलाङ्गारांसुदूषितां ५० रक्षितुंनोत्सहेक्का
पिनप्रीतिर्नेचमेव्यथा वैशंपायनउवाच रघुभूपवचःश्रुत्वाकन्यांनिकाशिताग्रहात् रोदमानांचतांकन्यांरथ्यामा
रोप्यसेवकः ५१ निन्युर्वनेचरुदतींघोररूपेभयावहे तैर्नीतासातदाकन्यानिःक्षिप्ता निर्जनेवने ५२ रुरोदभयसं
त्रस्तामृगीवभयपीडिताः एकाकिनीवनेतस्मिन्सिंहव्याघ्रनिषेविते ५३ विललापभयत्रस्ताकन्याकमललो
चना रुदंतीघोरशब्देनहाविधेकिमिदंकृतं ५४ वीक्षयंतिदिशःसर्वासंगभ्रष्टामृगीयथा ५५ इतिनाशिकेतो
पाख्यानेरघुराजकन्यात्यागोनामद्वितीयोऽध्यायः २ वैशंपायनउवाच एवंक्षिप्तावनेतस्मिन्भ्रममाणेम
हात्रृषिः कश्चित्तत्रसमायातःसत्यधर्मपरायणः तस्मिन्वनेचकार्यार्थीपुष्पमूलफलग्रहः उपगम्यस
दर्भादीन्गृहीत्वातत्रवैऋषिः २ ददर्शचततःकन्यांरोदमानांसुदुःखितां चिंतयामाससऋषिःकन्याचानिसु

रूपिणी ३ रूपेणदमयंतीवचित्ररेखातिलोत्तमा घृताचीतनिकारंभाअहिल्यागौतमीतथा ४ दाक्षापर्णीकिरानी
वाकिन्नरीनागकन्यावा यक्षीवाकिन्नरीवापिनागकन्याथवासुभा ५ राजकन्यामहाश्रेष्ठाइतिविस्मयमागतः राज
तेचवनाग्रेसाविद्युज्ज्योतिसमप्रभा ६ सुप्रतिष्ठितपादौद्वौसघनौजघनौतथा करौचकमलाकारौस्तनौपार्थिवसन्निभौसं
पूर्णा चंद्रवदनामाकर्णायतलोचनां इतिरूपवतीकन्यांपृच्छतिस्मद्विजोत्तमः ८ ऋषिरुवाच कात्वंकन्येमहाभद्रेत्वं
किमर्थमिहागता ऋषेस्तद्वचनंश्रुत्वाकन्यावचनमब्रवीत् कन्योवाच किमर्थंपृच्छसेविप्रमासेवकुलदूषिणी नाहं
सुरीनगंधर्वीननागीनचकिन्नरी १० रघुराजस्यदुहितापित्रात्यक्तामहावने अकस्मात्गर्भसंभूतिकारणात्तन्नवेद्म्यहं ११
पित्राचक्रोधयुक्तेननिक्षिप्तानिर्जनेवने शोकातुरादुःखिताहंदुःखभारेणपीडिता १२ कयामिकिंकरिष्यामिकोमां
त्राताभविष्यति एवमुक्त्वाततःकन्यारुदंतीभूमिमंडले १३ दृष्ट्वादुःखेनसंतप्तउवाचमुनिपुंगवः १४ ऋषिरुवाच
अद्यप्रभृतिमेदेवीदुहिताचाश्रमेवस कंदमूलफलैर्वृत्तिंकल्पयिष्येसुशोभने १५ इत्युक्त्वासहितस्तेनांमुनिराश्र
पमागतः निवेशनामसमुनिःपर्णशालांसमादिशत् १६ तत्राश्रमेपरेरम्येफलमूलसमन्विते शीतच्छायासमा
युक्तेरंतपक्षिणिसेविते १७ तत्राविशत्तदाकन्याक्षपयंतीदिनानिसा १८ दिनैःकतिपयैस्तत्रपूर्णोगर्भोविनिश्चि

ना॰ के॰ ततः मासेतु दशमे पूर्णे प्रसूता सा नृपात्मजा १९ नासाग्रेण प्रविष्टोसौ नाशाग्रात्स विनिर्गतः योगाभ्यासबलाद्बालो नासिके
५ तद्विनिस्सृतः २० ऋषिर्नामादिकं चक्रे नासिकेतं महामुनिं सर्वलक्षणसंपन्नो ज्ञानवान्रूपवान्शुभः २१ पोषया
मास तं पुत्रं मुखं वीक्ष्य पुनः पुनः कदाचिद्रोदमानं तं दृष्ट्वा पुत्रमुवाच सा २२ मातोवाच किमर्थं रोदसे पुत्र दुरात्मा पा
पसंभवः त्वदीयकारणे प्राप्ता ह्यवस्था चेदृशी मया २३ त्वद्गर्भधारणात्पुत्र वनवासमिहागता त्यक्ता च पितृमातृभ्यां बंधु
भिश्च विवर्जिता २४ सुखं सौधतले नित्यं सखीभिः परिवारिता वासाम्यहं वने त्यक्ता पित्रा त्वद्गर्भधारणात् २५ एवं चिंतय
ती बाला पुत्रस्नेहविवर्जिता गते संवत्सरे पूर्णे मंजूषं तृणकाष्ठजं २६ कृत्वा निधाय सुदृढं सुबद्धं सुस्थिरं शुभं तस्याम्यांतर
माक्षिप्य यत्नेन परिवेष्ट्य च २७ गंगाप्रवाहे निक्षिप्य गृहीत्वा तं तु बालकं उवाच वाक्यं पुत्रोये सा माता पुत्रवत्सला २८
मातोवाच पितरं तेन जानामि न जातो गर्भसंभवः संभूतो यस्मे गर्भे येन जातोसि पुत्रक २९ तस्य त्वमाश्रमं गच्छ येन
जातोसि पुत्रक अहं च श्रद्धानिर्दोषाचरामि वनवासिनी ३० पितुस्त्वमाश्रमं गच्छ येन जातोसि पुत्रक वैशंपायन उ
वाच ततः प्रवाहे गंगाया यापापात्यसौ कन्यकासुतः ३१ अथैतत्र नदीतीरे तपंति ब्राह्मणास्तपः तेषां मध्ये महातेजा पिता
उद्दालकः स्थितः ३२ आगच्छंतं च मंजूषं ददर्श मुनिपुंगवः तमानयामास तदा कौतूहलकरं परं ३३ समाप्ते देवकार्ये च

पितृकार्येतथैवच तदायस्यसतमंनूषेपिता उद्दालकःसुतं। ३४ आनीतंदृष्टिमात्रेणपरंविस्मयमागतः दृष्ट्वाचैवसुतंतत्र
बालंस्वांकृतिरूपिणं ३५ सुरूपंरक्तनेत्रांतंध्यानयोगेनसंस्थितं ज्ञातस्तेनतदाबालःस्ववीर्याद्धर्मसंभवः ३६ तमाश्र
मेतदापुत्रंस्थापयित्वावचोब्रवीत् उद्दालकउवाच वसत्वमाश्रमंपुत्रयथेष्टंसुसुखान्वितः तपास्थितोऽत्रऋषयः
सर्वमूलफलाशिनः ३७ पितुर्वाक्यंसुतःश्रुत्वानिवसन्नाश्रमेसुखं तत्रैवरमतेनित्यमाश्रमेचातिशोभने ३८ इति
नाशिकेतोपाख्यानेपितृपुत्रसंयोगोनामतृतीयोऽध्यायः ३ वैशंपायनउवाच ततोराज्ञोरघोःकन्यारुदंतीशोक
विह्वला पुत्रशोकेनसंतप्तागंगातीरंसमाश्रिता १ वीक्षंतीसानिजंपुत्रंभ्रमंतीपुत्रवत्सला रोदमानानदीतीरप्रयां
तीवनचारिणी २ ददर्शसाश्रमंपुण्यंगंगातीरेसुशोभनं दृष्ट्वाबालंसुतंतत्रक्रीडमानंतथाश्रमे ३ पप्रच्छप्रीतिसं
युक्तापुत्रबुद्ध्यास्वलेक्षणा पृच्छामित्वत्पितुर्नामविप्रर्षीयः पितातव ४ कुतस्त्वंकिंकरोत्यद्ययस्यत्वंसुप्रियःसुतः ह
र्षितंचमनोमेद्यदर्शनात्तवसंगमात् ५ पुत्रउवाच मातर्ममपिताश्रेष्ठोमुनिरुद्दालकोमहान् गतोसौफलमू
लार्थमग्निहोत्रंकरोतिसः ६ प्रयातःसवनोद्देशेसमित्पुष्पकुशान्हरन् आगमिष्यतिमेतातोह्यग्निशालांतुले
पनं ७ उद्देपंचकरिष्यामिकुशान्प्रस्तारयाम्यहं एवंपुत्रवचःश्रुत्वामातोवाचपुनर्वचः ८ मातोवाच मातांहंतेसुतो

ना०के मेत्वंस्वस्थोभवयथासुखं अग्निशालामग्निहोत्रमुपलेपंकरोम्यहं ९ लेपंकृत्वाततःसानुपनगेगानटेगता एतस्मिन्नंतरेश्रा
६ प्तउद्दालकऋषिगृहं १० ददर्शशालांसूपलिप्तांगोमयेनोपशोभितां मार्जितंचाश्रमंदृष्ट्वापुत्रंप्रोवाचसत्वरः ११ उद्दाल
कउवाच सर्वंप्रमार्जितंपुत्ररमणीयंकृतंमहत् अवलिप्तंचसकलमग्निस्थानंसुशोभनं १२ परापपाकारिणीयानितेकृ
तानिचसुव्रता तुष्टोहंतवभक्त्याद्य अग्निशालानुलेपनात १३ यत्किंचित्वयापुत्रनेदृशंशोभनंकृतं नाशिकेतउवाच नमया
विस्तरेणात्रकर्मकिंचित्कृतंप्रभो मात्राचैवकृतंमेद्यउपलेपंलिप्ताश्रमः १४ उद्दालकउवाच कृतस्तेजननीपुत्रकृत्वाकर्म
कतोगता समागतांत्वजानासिकथंपुत्रस्त्वमीदृशः १५ एतत्तस्यवचःश्रुत्वापुत्रोवाचमुनिंप्रति १६ नाशिकेतउवाच
उपलिप्याग्निशालांसागंगास्नानार्थिनीगता श्रुत्वाहृष्टोमुनिस्तत्रसोग्निहोत्रंचकारह १७ कृत्वाचदेवकार्यंचपितृका
र्यंतथैवच संस्थितोध्यानयोगेनसंपूर्णेनित्यकर्मणि १८ ध्यानादनंतरंपुत्रंवभाषेमुनिसत्तमः उद्दालकउवाचगृही
त्वाफलमूलानिप्राप्तानिचयथाहेतः १९ कंदमूलेषुश्वेतांवत्सतोषयस्वयथाविधि विद्यमानैस्तयाभाविसंतोष्यगृह
मागतो २० पितुर्वचनमाकर्ण्यप्रयातोयत्रसंस्थिता २१ नाशिकेतउवाच उवाचमातरंगत्वाअहारंतेददाम्यहं आ
श्रमोनिष्ठभवनिमान्यितायत्रतिष्ठति २२ मातोवाच प्रयतोभाषसेपुत्रमहांतेरोमहर्षणा अधर्मोतिमिदंवाक्यंनप्रशंशं

तिसाधवः २३ पितावायदिवाभ्रातामातावामातुलोऽथवै कन्यकांप्रदद्त्येवनपुत्रोमातरंददेत् २४ पितामहोतथाभ्रा
ताखकुल्योजननीतथाददातिकन्यकांसर्वेनपुत्रोजननींददेत् २५ तथापितत्रगच्छामिपुत्रत्वंतिष्ठसेसुत एवमुक्त्वाजगा
माथसमीपंचाश्रमंमुनेः २६ सपुत्रामागतांदृष्ट्वाप्रहृष्टोमुनिपुंगवः विचारयामासहृदिकिंकर्तव्यमितोमया २७ अयुक्त
मेतत्कन्यायाप्रदत्तायाःपरिग्रहः २८ उद्दालकउवाच प्रेरयामासतंपुत्रंमातुः प्रियचिकीर्षयामातरंपुत्रपृच्छस्ववंशेसाक
स्यसंभवा २९ कःपिताकाचजननीदेशेजाताहिकस्यसा कथंजातोभवान्पुत्रःकथमत्रागताहिसा ३० एवंवदयथान्यायं
सर्वंपृच्छयथातथं तथाकर्तास्मितत्कार्यंयथाधर्मोभवेन्मम ३१ वैशंपायनउवाच श्रुत्वापितुर्वचोसौहिगत्वापप्रच्छमातरं
मातःकथयसर्वंमेपृच्छत्येषपितामम ३२ नासिकेतउवाच कस्यवंशेसमुत्पन्नाकोदेशोजनकस्तकः कथंचाहंसमुत्प
न्नःकथमत्रागतावने ३३ सर्वमेतद्यथापूर्वंसत्यंब्रूहिममाग्रतः मातोवाच शृणुपुत्रमहाप्राज्ञ यन्मांत्वंपरिपृच्छसि
३४ पूर्वकर्मानुयोगेनएतज्जातंविचेष्टितं अविज्ञातगतिस्तावद्दुस्तरापूर्वकर्मणा ३५ कथयामियथावृत्तंशृणुष्वै
कमनासुत रघुनामेतिविख्यातोराजात्रैलोक्यपूजितः ३६ सत्यसंधःप्रजापालोधर्मरक्षणतत्परः तस्याहंचसुतातात
समुत्पन्नासुभाविनी ३७ वसामिशैलशिखरेसाखिभिःपरिवारिता कन्यादशसहस्राणिममसुश्रूषणेरताः ३८ वसंतेपु

नां॰के ष्ठितवनेविषवत्यासमागमे विद्यापितेमयानीतोगंगास्नानार्थिनीगता ३९ तत्राहंकुर्वतीस्नानंकमलंचसमागतं सुखेनवेष्टितंद
७ र्भेमुक्त्वाघ्रातंमयातदा ४० तस्यैवाभ्यंगरेणोनासाभ्यं तरतोगतं संभूतस्त्वंहिमेगर्भेदर्भगायास्तदासुत ४१ पित्रात्यक्त्वावनेदुर्गे
कोपोविष्टेनदुःखिता तत्राहंरुदतीदृष्टामुनिनाचफलार्थिना ४२ कृपातस्यसमुत्पन्नासमानीतास्वमाश्रमं प्रसूताआश्र
मेतस्त्वंजातोममपुत्रक ४३ नासाग्रेणतुसंभूतोऋषिर्नामतदाकरोत् नासिकेतइतिप्रोक्तंआश्रमेमुनिनातदा ४४ मंजू
षमध्यतस्त्वाप्यगंगायांप्रेषितस्ततः पुनश्चाहंसमायाताशोकार्तात्वाविचिन्वती ४५ एतदेवमयाप्रोक्तंतवजन्ममहामते श्रु
त्वामातुर्वचःपुत्रोपितरंप्राहवैतदा ४६ नाशिकेतउवाच यथाश्रुतंतथासर्वंकथयामाससवैपितुः सपुत्रस्यवचःश्रुत्वामु
निर्विस्मयमागतः ४७ अहोप्रजापतेसत्यंममेदंवचनंत्वभूत् इतिश्रुत्वामुनिःपुत्रमुवाचवचनंतदा ४८ उद्दालकउ
वाच मात्रासहाश्रमंतिष्ठयावदागमनंमम गच्छामिरघुराजानंप्रार्थितुंजननीतव ४९ वैशंपायनउवाच एवमुक्त्वा
ततोविप्रःकन्यार्थीराजवेश्मनि जगामससभामध्येददर्शनृपमास्थितं ५० मंत्रिभिस्सद्सैश्चब्राह्मणैः परिवारि
तंगीतनादविनोदैश्चशास्त्रवादविशारदैः ५१ स्तूतंप्रकृतिलोकैश्चजयमंगलनिःस्वनैः तंदृष्ट्वासरघुर्विप्रमागतंमुनिपुं
गवं ५२ प्रत्युत्थायययथाज्ञापंपूजयामासतंनृपः शुभासनेचोपवेश्यपाद्यार्घ्यैःसमपूजयत् ——————

५३

विश्रांतंसुखमासीनंवाचामधुरयानृपः उवाचमनिशार्दूलंभक्तिपूर्वमिदंवचः ५४ राजोवाच अद्यमेसफलंजन्मचाद्य
मेसफलाक्रिया अद्यमेसफलंज्ञानंयत्त्वयासहसंगमः ५५ तवदर्शनमात्रेणपूतोहंसहपूर्वजैः धन्यामेद्यगृहाःसर्वेध
न्यामेद्यकुटुंविनो ५६ प्रसीदभगवन्विप्रब्रूह्यागमनकारणं उद्दालकउवाच दृष्टामेपृथिवीसर्वावनाश्रमसन्विता
५७ राजानःपृथिवीपालाःप्रजापालनतत्पराः नत्वायाशद्दशोलोकेदीर्घापुर्मेवसुव्रत ५८ रघुरुवाचगवांशतसह
स्राणिहेमकोटिशतानिच तुरंगादीनिचान्यानियथेछसितथावद उद्दालकउवाच नमेतुरंगमादीनिहेमकोटिश
तानिच गवांशतसहस्राणियाचयामितवानघ ६० त्वामहंप्रार्थयेराजन्कन्यामेकांददस्वमे वंशस्यकारणार्थं।पक
न्यार्थेहमिहागतः ६१ राजोवाच राज्यंगृहाणविप्रेंद्रधनरत्नसमान्वितं यदिछसिददाम्येषकन्यामेऽद्यनविद्यते ६२
कन्यैकाचपुरेवासीत्सामृतामुनिसत्तम उद्दालकउवाच याकन्याराजशार्दूलत्वयात्यक्तापुरावने नमृतासामहारा
जन् आस्तिधर्मपरायणा ६३ रघुरुवाच कौतूहलमहंमन्येकथयस्वयथातथं अनाथासावनेत्यक्ताकथंजी
वतिवैमुने ६४ उद्दालकउवाच प्रयातिकृतकर्मैचपुराविधिनियोजितं निर्मितंदैवसंयोगादुर्निवार्य्यंसुरासुरैः ६५
शृणुजेत्वंहिमेसर्वंयत्पुराकर्मचेष्टितं वंशस्यकारणार्थायपयातोहंयत्रपद्मभूः ६६ ध्यायंतंचप्रयत्नेनततःप्रत्यक्षतांगतः

ना॰के॰ तदा मया चकथितं तद्भार्यार्थं सुतस्य वै ६७ तेन चोक्तमिदं वाक्यं पूर्वं पुत्रो भविष्यति पश्चाद्भार्या च विप्रेंद्र रघुवंशोद्भवा शुभा ६८ एव
८ मुक्त्वा वचो ब्रह्मा तत्रैवांतरधीयत ततोहमाश्रमं प्राप्तः स्थितस्तत्कर्मचिंतया ६९ कथं मे प्रथमं पुत्रो भार्य्या पश्चात्कथं भवेत् तत्प
मानस्य च तपोरेतोत्सर्गो भवन्मम ७० तन्मया पद्ममध्ये तु विनिक्षिप्य प्रयत्नतः कुशैस्तु वेष्टयित्वा तु गंगायां प्लापितं पुनः ७१
ततस्तु कन्यका राजन् गंगास्नानार्थिनी गता आघ्रातं पद्ममादाय नाशाग्रे वीर्यमागतं ७२ तस्या गर्भः समुत्पन्नो मम वीर्या
न्न संशयः नाशाग्रेणातु संजातो नाशिकेतः स उच्यते ७३ सा तु निष्ठति राजेंद्र संपूर्णा मम चाश्रमे तां प्रयच्छ कल्याणार्थं सपुत्रा
मात्मकन्यकां ७४ एतदर्थं समायाता कन्यां प्रार्थयितुं वनात् नादत्तामिह गृह्णाति परकन्यां हि मादृशः ७५ वैशंपाय
न उवाच ततो विस्मयमापन्नो रघुरंतःपुरं ययौ अंतःपुरमसौ सर्वं कथयामास चेष्टितं ७६ श्रुत्वाद्भुततमं सर्वे विस्मयो
फुल्ललोचनाः आश्चर्यं परमं जग्मुः श्रुत्वा विधिनियोजितं ७७ पुनश्चैवागतो राजा ब्राह्मणं पुनरब्रवीत् बहुभक्तिसमा
युक्तो विनयानतकंधरः ७८ राजोवाच कन्यां ददामि ते विप्र शृणु त्वं परमं वचः समारुह्य रथे रम्ये मम आज्ञाकारिभिः सह
७९ गत्वा समानय सुतां सपुत्रां मे च मानद आगतामिह दास्यामि तुभ्यं तां विधिपूर्वकं ८० एवमुक्तस्ततो विप्रः सम्यक्सं
तुष्टमानसः समारुह्य रथं गत्वा चानयामास तां पुनः ८१ आनीता सा तदा कन्या सपुत्रा रथसंस्थिता दृष्ट्वा विस्मयमा

यन्त्रास्सर्वैस्तैःपुरवासिनः ८२ प्रवदंतिपुराराज्ञाराजन्नष्टासुजातव आश्चर्य्यायपतिर्जनानांततःपुरनिवासिनः ८३ एवंज
नेप्रवदंतिकुतूहलसमन्वितः प्रददौकन्यकांराजाविवाहमकरोत्तदा ८४ पारिवर्हंददौराजादासीदासांस्तथावसु ध
नंधान्यंचवासांसिमुक्ताभरणकुंडले ८५ हारकंकणरत्नानिहेमांवरपुनानिच रथंगजंहयंवस्त्रंमहागावस्त्वसंख्य।
या ८६ रघुराजेनतत्सर्वंदत्तंजामातरंप्रति ततोब्रवीद्द्विजःसोथराजानंविनयाद्वचः ८७ उद्दालकउवाच । किंकरिष्या
म्यहंद्रव्यैस्तिष्ठंतुतववेश्मनि एवमुक्त्वाततःसर्वंगजाश्वादिधनंवसु ८८ प्रेषितंरघवेसर्वंरथमारुह्यतत्रवै आजगा
माश्रमेस्वीयेभार्यापुत्रसमन्वितः ८९ उवाससुखंविप्रोऋषिरुद्दालकस्तदागृहस्थकर्मणिचरन्नग्निहोत्रपराय
णः ९० पत्नीतस्यमहाभागाराजपुत्रीयशस्विनी पतिंशुश्रूषयामासपुत्रभ्रातृप्रियासती ९१ इतिहासमिमंपुण्यंप
रंपौराणिकेशुभं शृण्वतःकथयंतश्चमुच्यंतेसर्वपातकैः ९२ विच्छेदोनभवेत्स्त्रीणांपुत्रवान्सुखवान्भवेत् पितृ
भक्तोभवेत्सम्यक्नेक्ष्यंतेयमकिंकरैः ९३ इतिनाशिकेतोपाख्यानेचंद्रावत्युद्दालकविवाहोनामचतुर्थोऽध्यायः
४ जनमेजयउवाच एतत्पृच्छामितेविप्रसंशयंकथयप्रभो पुत्रेसुदुर्लभंप्राप्यकथंत्यागेनियुक्तवान् १ किमर्थंत
स्यशापोवैपित्रादत्तःसुतस्यवै कथंयमपुरींप्राप्तःकथमेवागतःपुनः २ कथंचनरकांदृष्टाकथंस्वर्गंसुखावहं कथं

ना॰के॰ दृष्टोधर्मराजश्चित्रगुप्तश्चलेखकः ३ तथातेनसमाख्यातानानानरकयातना स्वर्गभोगाश्चविविधवत्पुरायपापगतीइ
९ मे ४ एतत्सर्वंमहाप्राज्ञमह्यंकथयसुव्रतः कथांकथयतस्तत्रप्रीतिर्मेजायतेहरौ ५ तद्भक्तेषुचसौहार्दंमहतांगुणा
कीर्तनात् ६ वैशंपायनउवाच शृणुराजन्यथावृत्तंयथाशापेनयोजितः पित्राक्रुद्धेनहिपुराऋषिणायमसादनं ७
आगतश्चयथाराजन्तत्सर्वंकथयाम्यहं उद्दालकोमुनिवरःससुतःस्वाश्रमेवसन् ८ उवाचपुत्रंधर्मात्मानाशिकेतंम
हामुनिः उद्दालकउवाच गच्छपुत्रवनेशीघ्रंसमिधस्त्वंसमानय ९ कुशपुष्पफलानीहमूलानिविविधानिच क्षिप्र
मानीयतांपुत्रचाग्निहोत्रस्यकारणा १० इतिश्रुत्वापितृवचःसजगामवनंशुभं नानावृक्षसमाकीर्णंनानाद्रुमलताकु
लं नानापुष्पसमाकीर्णंनानापक्षिसमावृतं स्नानंकृत्वासतत्रैवविधिदृष्टेनकर्मणा १२ देवार्चनंकृतंतेनदिव्यपुष्पै
र्मनोहरैः नैवेद्यैःफलमूलैश्चदेवर्षिपितृतर्पणं १३ योगीसमाधिमारेभेध्यानधारणकर्मणा तदातत्रैवसंस्थानेमनसा
हर्षितेनहि १४ संवत्सरार्द्धमगमद्योगयुक्तेनकर्मणा देवार्चनंचयागंचनित्यंप्रकुरुतेसदा १५ विस्मृतापितुराज्ञानच
फलंमूलंचविस्मृते नकरोतितदाकिंचिद्विष्णुध्यानपरायणः १६ महायोगरतंशांतंविष्णुपूजनतत्परं दृष्ट्वापुत्रंमुनिः
कोपादिदंवचनमब्रवीत् १७ उद्दालकउवाच किंत्वयाफलमूलानिचिरंगत्वावनांतरे नानीतानिवृथाध्या॰

नमग्निहोत्रं च वै नैव किंकि १८ अग्निहोत्रेणात्तृप्यंति ऋषयः पितृदेवताः अपरे च गुणाः सर्वे मुनयोऽतिथयो नराः
१९ पितुर्वै वचनमाकर्ण्य प्रत्युवाच सनातनः नासिकेत उवाच अग्निहोत्रमिदं तात संसारस्य च बंधनं २० जन्मम
त्युभयं घोरं संसारे पतनं ध्रुवम् योगाभ्यासात्परं नास्ति संसारार्णवतारणं २१ ब्रह्माद्या देवताः सर्वा इंद्राद्या येन राग
णाः सर्वे योगवशात्सिद्धास्तं योगं किं त्वं नाभ्यसेत् २२ उद्दालक उवाच ऋषयश्च महाभागा मे चान्ये तपसि
स्थिताः अग्निहोत्रमुपासीना नित्यकर्मपरायणाः २३ अग्निहोत्री सदा स्नात इत्येषा वैदिकी श्रुतिः नासिकेत उ
वाच स्वर्गं गत्वा पुनर्जन्म संसारे घोरसागरे २४ योगाभ्यासात्परं तत्त्वं न मृतं न भविष्यति न कार्यमग्निहोत्रेण योगा
भ्यासं तथा कुरु २५ वैशंपायन उवाच उद्दालकः पुत्रवचः श्रुत्वा क्रोधं समागतः उवाच वचनं पुत्र मयुक्तं ग
दितं त्वया २६ निंदको यज्ञवेदानां दुरात्मन् पितृदूषक गच्छ शीघ्रं यमं पश्य ब्रह्मदंडहतप्रभः २७ श्रुत्वा शापं तदा
रौद्रं पतितो धरणीतले प्रमाणमिति चोत्थाय नासिकेतो महामुनिः २८ तवाज्ञया मि तात यत्र वैवस्वतो यमः प
तितं पुत्रकं दृष्ट्वा ऋषिर्जातोतिविह्वलः २९ महाशोकेन संतप्तो विललाप सुदुःखितः हा पुत्र हा वत्स शिशो म
हात्मा न सुबुद्धिमन् ३० अहं पापी दुराचारो अहं क्रोधी दुरात्मवान् यत्र वैवस्वतो राजा घोरा नरकयातना ३१ नगं

ना॰ के॰ तव्यं महाभाग प्रियो सि मम पुत्रक रौद्रायमपुरीं तत्र नरकास्तत्र दारुणाः ३२ न गंतव्यं त्वया पुत्र मां च त्यक्त्वा च मानवं एवं
१० संजल्प्यमानं तु पितरं च पुनः पुनः ३३ उवाच नासिकेतस्तु पितरं मुनिसत्तमं नाशिकेत उवच नमस्करोमि त्वां नाथ त्वया
स्पामि यमप्रसादतं ३४ पित्रा वाक्यं यदुक्तं हि असत्यं न भवेत्क्वचित् तव सत्यं करिष्यामि यदि सत्यं ममास्ति वै ३५ तव वा
त्तां प्रकरिष्यामि माविकल्पं कुरु प्रभो सत्येन हि सदा नाव्यं सत्ये वायुः प्रवाति हि ३६ सत्येन धार्यते लोकः सत्येन पृथि वी
स्थिता सत्येन ज्वलते वह्निः सत्ये सूर्योदयो ग्रहाः ३७ सत्येन धार्यते लोकाः सत्ये धर्मः प्रतिष्ठितः अश्वमेधसहस्राणि स
त्यं च तुलया धृतं ३८ नरमेधशतं सम्यक् सत्यमेवाधिकं फलं श्मशानवह्निजानीतो नरं सत्यवहिःकृतः ३९ तस्मात्सत्यं
करिष्यामि धर्मस्सत्ये स्थितस्सदा तस्मात्सर्वप्रयत्नेन शोकं त्यक्त्वा स्थिरो भव ४० द्रष्टुं यमपुरीं सर्वां धर्मराजं च वेश्मनि
सत्वरं चागमिष्यामि तव पादसमीपतः ४१ पितरं मातरं चैव नमस्कृत्य कृतांजलिः नासिकेतो विनीतात्मा क्षणेनांतर
धीयत ४२ दिव्यमंत्रेण रक्षां च दिव्य दृष्टिं विधाय च संप्राप्तो वायुवेगेन यत्र राजा स्वयं यमः ४३ दृष्ट्वा तु धर्मराजानं ज्व
लंतमिव पावकं सिंहासनसमासीनं सूर्यपुत्रं महाबलं ४४ तेन स्तोत्रं समारब्धं धर्मराजस्य भक्तितः ४५ इति नाशिके
तोपाख्याने यमदर्शनं नाम पञ्चमोऽध्यायः ५ वैशंपायन उवाच प्रविष्टस्तु सभामध्ये विद्वज्जनविभूषिते तेन स्तोत्रं

समारब्धंश्रूयतांराजसत्तम १ नाशिकेतउवाच नमस्तेधर्मराजायत्रैलोक्यस्यपितामह सर्वलोकाधिपतयेनमःसर्वध
रायच २ महादुःखस्वरूपायधर्माधर्मविचारिणे पितृणांपरमोनाथनमस्तेसुरपूजित ३ नमस्तेवुद्धिधारायनमस्तेनि
र्मलायचसुप्रभायसुरूपायनमस्तेसूर्यजायच ४ धर्माधिकाररा श्रीमन्नमस्तेवहुरूपिणे नमोधर्मायमहतेनमः
पातकवाधिने नमोज्ञानस्वरूपायधर्ममूर्तेनमोस्तुते इतिस्तुत्वाद्विजवरस्तूष्णीमासीद्यमांतिके ६ उवाचवा
क्यंविप्रस्ततोयमप्रसन्नमानसंमुने नासिकेतकृतंस्तोत्रंप्रत्यक्षंपापनाशनं ७ यइदंपठतेसम्यक्धर्मराजस्यकीर्तनं न
तस्यजायतेव्याधिःकायरोगोनवैक्वचित् ८ यमश्चतुष्यतेतेनस्यनरकान्नैवपश्यति श्रुत्वास्तुतिंचविप्रस्यधर्मराजो
ब्रवीद्वचः ९ धर्मराजउवाच तोषितोस्मित्वयाविप्रब्रूहिकस्मादिहागतः ज्ञानवांस्त्वंतपःश्रेष्ठःसत्यात्मावंशधार
राः १० नासिकेतउवाच शृणुध्वंधर्मराजाद्यतवपार्श्वंयथागतः पित्राहंक्रोधयुक्तेनप्रेषितोयमसादने ११ तेन
चोक्तंयमंपश्यतस्यशापादिहागतः त्वत्प्रसादात्पितुःसत्यंवाक्यंयातिसुराधिप १२ कृतार्थोस्मिनसंदेहोदर्श
नात्तवमानद धर्मराजउवाच धन्यस्त्वमसिविप्रेंद्रपितुराज्ञांकरोतियः १३ धन्यातेजननीविप्रधन्योवंशःसुधार्मि
कः किमिच्छसिमहाप्राज्ञविचरस्वयथासुखं १४ वरंब्रूहिप्रयच्छामियत्तेमनसिवर्त्तते त्वयाद्भुतंकृतंकर्मतुष्टोहंतेद्वि

ना॰ के॰ जोत्तम १५ नासिकेत उवाच यदि तुष्टोसि मे देव वरमेतं प्रयच्छ मे पश्यामि त्वत्पुरीं रम्यां चित्रगुप्तं च लेखकं १६ पापि-
११ नो यत्र पच्यंते सुखं सुकृतिनः स्थिताः एतदिच्छाम्यहं द्रष्टुं प्रसादं कुरु सूर्यज १७ वैशंपायन उवाच आज्ञापयामा
स ततः किंकरान् पुरतः स्थितान् नीयतामेष विप्रस्तु चित्रगुप्तस्य वेश्मनि १८ पुरीं संदर्शयत्वेनं यत्नेन सुखसंस्थितं
विप्रोयं सुमहाप्राज्ञः सत्यधर्मपरायणः १९ पितुः शापादिहायातो द्रष्टुं वै यमसादनं । यमस्याज्ञामिमां श्रुत्वागता
स्ते शीघ्रगामिनः २० सार्द्धं वै नासिकेतेन चित्रगुप्तस्य वेश्मनि द्वारपालं समासाद्य चेदं वचनमब्रुवन् २१ दूता ऊचुः
ब्राह्मणेन समायुक्ता यमेन प्रेषिता वयं ब्राह्मणं धर्मतत्वज्ञं दर्शयध्वं पुरीमिमां २२ तेषां तद्वचनं श्रुत्वा द्वारपालो गतः
क्षणात् न्यवेदयच्चित्रगुप्तं ब्राह्मणं द्वारसंस्थितं २३ तमानयामास तदा यमदूतैः समन्वितं दूतैरुक्तश्चित्रगुप्तो ब्राह्मणो
यं समागतः २४ दर्शयध्वं पुरीमेतां सुखेन द्विजसत्तमं एवं विप्रो महाप्राज्ञः सत्यधर्मपरायणः २५ पितुः शापस्य यो
गेन मम प्राप्तः पुरीं द्विजः अस्येच्छा महती कार्या यथा कामयते द्विजः २६ धर्मात्मा तपसा युक्तो ज्ञाननिधिर्द्विजोत्त
मः चित्रगुप्त उवाच ब्रूहि विप्र महाप्राज्ञ किमिच्छसि वरं परं २७ यमेन प्रेषितोसि त्वं तस्मात्त्वाहि गरीयसी नासिकेत उवाच दृ
ष्टो भवान्महाभागः सर्वशास्त्रविशारदः २८ यमतुल्यो महातेजा धार्मिको धर्मविचारकः त्वं वेत्सि सर्वभूतानां धर्माधर्मं शुभाशु

मं २९ ज्ञानविज्ञानसंपन्नः सत्यधर्मपरायणः धन्योयंधर्मराजोहिधन्यस्त्वंचित्रलेखकः ३० धन्यासभामंत्रयुताधन्यो
हंतवदर्शनात् पश्याम्यहंपुरींरम्यांदुःखानिचसुखानिच चित्रगुप्तउवाच रेदूतायमवाक्येनममवाक्याच्चतत्वतः द
र्शयध्वमिमंसर्वंदुःखानिचसुखानिच ३२ यथानपीड्यतेविप्रोनरकैर्व्याधिभिस्तथा दर्शयित्वापुनर्विप्रमानयध्वं
मामांतिकं ३३ आज्ञप्ताश्चित्रगुप्तेनदूताश्चक्रुर्यथातथा दर्शयित्वातुतत्सर्वंपृथक्त्वंधर्ममंदिरं ३४ आनीतोपिपुर
स्तत्राचित्रगुप्तस्यवेश्मनि दृष्ट्वाविप्रंसमायांतंचित्रगुप्तोब्रवीद्वचः ३५ चित्रगुप्तउवाच नीयतांचद्विजःशीघ्रंध
र्मराजस्यसंनिधौ नमस्कृत्यगतास्तत्रयत्रवैवस्वतोयमः दृष्ट्वायमस्समायांतंनासिकेतंद्विजोत्तमं अर्द्धासनंददौ
तस्मैअर्घदानेनपूजयेत् ३६ नानास्थानानिदृष्टानिचित्रगुप्तश्चलेखकः सुखेनसमनुप्राप्तःकिमिच्छसितपोनि
धे ३९ नासिकेतउवाच त्वत्प्रसादान्मयादेवदृष्टंसर्वंशुभाशुभं स्वर्गास्थितानिरम्याणिविषमंनरकाणिच ४०
पितामेदुःखितश्चैवशोकमोहप्रपीडितः तस्यपादौप्रपश्यामिस्वामिन्नाज्ञाभवेद्यदि ४१ यमउवाच गच्छद्विज
श्चैवयत्रतिष्ठतितेपिता अजरोप्यमरस्त्वंवैभवदोषविवर्जितः ४२ भवतामक्षयोविप्रव्रतयोगबलस्यच वैशं
पायनउवाच एवमुक्तोयमेनासौनासिकेतोयमांतिकात् ४३ येनमार्गेणहिगतस्तेनैववशमागतः यत्रतिष्ठ

ना॰के॰ त्यसौतात आगतोनिमिषार्द्धतः ४४ अपश्यन्मातरंतत्ररुदंतींपुत्रवत्सलां पुत्रंदृष्ट्वासमायांतमृषिरुद्दालकोमुदा
१२ ४५ हर्षेणामहताप्युक्तोऽद्यदेवचनमब्रवीत् उद्दालकउवाच अद्यमेसफलंजन्मअद्यमेसफलाक्रिया ४६ अ
द्यमेसफलापूजादृष्ट्वापुत्रेसमागते अहंक्रोधीदुराचारःपापात्मानिर्मितःपुरा ४७ विनापराधंपुत्रोवैमयाशापा
त्प्रयोजितः पुत्रंदृष्ट्वासमायांतंमुक्तमूर्द्धजसंयुतः ४८ पुत्रेपप्रच्छधर्मात्मामुनिरुद्दालकस्तदा उद्दालकउवाच ध
न्योसिपुत्रयोगेशधन्यातेवुद्धिरीदृशी ४९ यस्त्वंप्राप्तोसिकुशलीयमस्यसदनात्पुनः वैवस्वतपुरेप्राप्तःपुनरेवइ
हागतः ५० तपोयोगवलंचास्यप्रभावोमेसुतस्यच श्रुतश्चैवापिनोदृष्टआगतोयंयमालयात् ५१ विस्मितामुनयः
सर्वेतवदृष्ट्वासमागमं कथंयमपुरींदृष्ट्वाकथंशीघ्रंसमागतः ५२ यममार्गःकीदृशश्चयमश्चैवतुकीदृशः । किंकिल
व्धंत्वयापुत्रोभोजनेफलमेवच ५३ पापंकिंचित्तत्रवैदृष्टंयेकेचित्तापसास्तथा अन्यत्सर्वंत्वयादृष्टंकथयस्वयथात
थ्यं ५४ नासिकेतउवाच त्वत्प्रसादादहंतातसंप्राप्तोयमसादने देवाश्चविविधादृष्टायमश्चभागवान्प्रभुः ५५ चित्र
गुप्तोमयादृष्टःसर्वलोकनियामकः कालश्चैवकृतांतश्चयमदूतामहावलाः ५६ धर्मराजेनतुष्टेनपुनरेवविसर्जितः
संतुष्टेनवरोदत्तअजरश्चामरोभव ५७ इतिनासिकेतोपाख्यानेपितृपुत्रसंवादोनामषष्ठोऽध्यायः ६ वैशंपायनउ

वाच ऋषयश्चततः श्रुत्वासर्वेविस्मयमागताः यमस्यभवनंगत्वानासिकेतइहागतः १ पृच्छार्थंचसमायातास्तपोव्रतधरा।
द्विजाः येचाम ऋषयः सर्वेउद्दालकसमाश्रयाः २ अग्निशुश्रूषकार्येचव्रतमासोपवासिनः पक्षोपवासिनश्चान्येये।
चान्येजलशायिनः ३ पंचाग्निसाधकायेचदुर्धर्षाश्चतथापरे अधोमुखास्थिताश्चान्येआदित्याभिमुखाः परे ४
निर्मांसास्थिधरायेचनिराहारास्तपस्विनः एकपादेनतिष्ठंतितपस्यंतिदारुणं ५ भास्करंपश्यमानाश्चमहा
तेजःसमन्विताः नग्नव्रतधराश्चान्येअग्निहोत्रपरायणाः ६ जपहोमव्रतधरा ऋषयोह्युग्रतेजसः योगव्रतधराश्चा
न्येआगताब्रह्मचारिणः ७ शुष्कपर्णाशनाश्चान्येचांद्रायणपरायणाः आगतास्त्वरिताःसर्वेनासिकेतस्यपृछ
काः ८ नमस्कृत्यतथान्योन्यंपप्रच्छुर्विनयान्विताः ऋषयः ऊचुः उद्दालकात्मज प्राज्ञ दृष्टंकिंयमसादने ९ श्रुतेवासु
खदुःखादितत्सर्वंकथयस्वनः कीदृशोयमलोकश्चपंथास्तत्रचकीदृशः १० यमस्यकीदृशंरूपंकारणंतस्यकीदृ
शं कीदृशास्तत्रतेदूताःकालपाशश्चकीदृशः ११ कीदृशस्तत्रआचारःकास्थितिस्तत्रवैद्विज कीदृशास्तत्रलो
काश्चतुष्टावाप्रियवादिनः १२ कीदृशाधर्मसंयुक्तास्तपोज्ञानेचकीदृशं कथंदृष्टास्त्वयाविप्रऋषयःसर्वयोगि
नः १३ यमदंडस्यकिंरूपंकीदृशाः कालयुक्तयः कथंतत्कालपाशश्चकथंवानरकेस्थितिः १४ दानंवाप्यथवा

नाके पुण्यं व्रतानि विविधानि च इहैव यत्कृतं कर्म कथं तत्रैव लभ्यते १५ कथं तत्प्राप्यते सौख्यं दुःखं च मुनिनंदन वयं सर्वे महा
१३ भागया मोथ यमसादनं १६ तत्प्रकाशनि विप्रास्म वयं शुश्रूषवो मुने सत्यं कथय धर्मज्ञ त्वमुद्दालकनंदन १७ नासि
केत उवाच शृणुध्वं ऋषयः सर्वे ये चान्ये तपसि स्थिताः नमस्कृत्य प्रवक्ष्यामि धर्मराजं महामुने १८ दृष्टं यत्तत्प्रव
क्ष्यामि महद्धै रोमहर्षणं पितुः शापाद्गतश्चाहं यत्र राजा स्वयं यमः १९ कृतांजलिपुटो भूत्वा स्तुतिभिस्तोषितो य
मः यमराजेन दत्तं वै शुद्धमर्घासनं मम २० देवाश्च विविधा दृष्टा यमदूता महाबलाः चित्रगुप्तो मया दृष्टः सर्वभू
तानि शास्तिपः २१ लब्धो वरो मया तत्र विनया विष्टा चेत सा अजरश्चाभ रश्चैव व्याधिदुःखविवर्जितः २२ आगतो
हं पुनश्चात्र प्रसादात्तस्य सुव्रताः पुनश्चाहं प्रवक्ष्यामि यमसादनविस्तर २३ सहस्रयोजनायामं तत्पुरं चैव शोभनं त
त्र दुर्गं महाकायं पंचयोजनमुच्छ्रयं २४ चतुःपुरं चतुर्द्वारं चतुःप्रतप्रशेपंथं गीतवादित्रसंयुक्तं नानावर्णोपशोभितं
नानापुष्पलताकीर्णं नित्यं चामरवीजितं मध्ये यमस माहष्टा ऋषीणां योगिनामपि २६ गणोप्सरोभिर्गंधर्वैर्वि
द्याधरमहोरगाः पूर्वद्वारे प्रविशंति शिवभक्तिपरायणाः २७ ग्रीष्मे जलप्रदानारो हेमंते चंतथें धनं विश्रामयंति ये श्रां
तान् विप्रान् व्याधिप्रपीडितान् २८ दुःखिनं स्वागतेनूते दंपत्योस्सुखदाश्रमे ध्यानधर्मरताः सत्याः क्रोधलोभविवर्जिताः

२९ पितृमातृपरामर्त्यागुरुशुश्रूषारतास्सदा एतेपूर्वेप्रविशंतिद्वारेचान्येतथोत्तरे ३० अतिथिंपूजयेद्यस्तु देवद्विजरताश्च
ये पवित्रकर्मकर्त्तारोनशनेनमृताश्चये ३१ ब्रह्मविष्णाश्चयेभक्तास्तीर्थस्नानरताश्चये पितृधर्मरतायेचपितुराज्ञांकरोति
यः ३२ एतेवैचोत्तरेद्वारेपश्चिमद्वारसंस्थिताः सत्यधर्मरतायेचनित्यंधर्मपरायणाः ३३ वर्जिताःपरहिंसायांयेमुक्ताःका
मलोभतः परद्रव्येषुनिर्लोभाःपरदारपराङ्मुखाः ३४ विष्णुभक्तामहात्मानःशिवभक्तिरताश्चये एतेवैपश्चिमेद्वारेप्र
विष्टाःसुखभोगिनः ३५ विमानवरमारूढाःगीतवादित्रसंयुताः मयादृष्टाप्रविशंतःपश्चिमद्वार पूजिताः ३६ अन्येच
दक्षिणाद्वारेप्रविष्टाःपापकारिणः दुरात्मानोदुराचारादुःशीलाःदुष्टकर्मिणः ३७ सदैवासत्यवादाश्चगुरुदेवपराङ्मु
खाः पुराणवेदमीमांसामातापित्रोश्चनिंदकाः ३८ एतेवैदक्षिणोद्वारेपापिनःक्रूरकर्मिणःकथयामियथादृष्टंशृण्वंतु
द्विजसत्तमाः ३९ हाहाकारोमहानग्रस्ततत्रद्वारेमयाश्रुतंः कृष्णांजनसमाकारादुःखस्थाघोररूपिणः ४० प्रविशंतितदा
पापास्ताडितायमकिंकरैः अंधकारेमहाघोरेश्वभिःकाकैश्चभक्षिताः ४१ कंटकैःस्तीक्ष्णैर्लोहाग्रैस्तप्तांगारैश्चभर्जिताः
सिंहैर्व्याघ्रैश्चऋक्षैश्चगृध्रैश्चवहुपीडिताः ४२ तत्रैवपापकर्माणोयमदूतैर्महावलैः मुद्गरैःपीड्यमानाश्चलोहदंडैश्च
दारुणैः ४३ प्रविशंतोमयादृष्टाःकृष्यमाणाश्चकिंकरैः तस्मिंस्तुदक्षिणाद्वारेमहारौद्रेप्रवर्तते ४४ तत्रमेनरकादृष्टामहा

नाके तो रोमहर्षणाः तदहंवः प्रवक्ष्यामि श्रन्यच्च द्विजसत्तमाः ४५ कथ्यमाने च नरके भयं तीव्रं प्रजापते वहुशश्च प्रकीर्णाश्च नरकाश्च
२४ सहस्रशः घोरशब्दाश्च गंभीराः हाहाकारयुतास्तथा कुंभीपाके च पंचं तेन महारौरवरौरवे ४७ दुराचारा महापापाः सहंते दीर्घयात
नाः लोचनोत्पाटमस्वस्थं निरुच्छ्वासं सुदारुणं ४८ असिपत्रवनं चैव आर्तनादं तथापरं पूयपूर्णं न दीनं त्र कूपाश्च कृमिपूरि
ताः ४९ विष्ठापूर्णास्तथा कूपाः कर्णनासाविकर्तनाः अन्ये देतन्महारौद्रं तापदुःखकरं तथा ५० अन्यद्दृष्टं महारौद्रं घनं ते
लोष्मकं कनम् कृमिसंकुलोमेदाख्यं तथा चामिषभोजनं ५१ तत्रैरौद्रा महाकाया व्याकुलाः पापकारिणः पर्वताऱोहणं
चैव शूलारोहणमेव च ५२ तीक्ष्णतुंडा महागृध्राः काकाश्चैव भयंकराः खादंति पापिनां मांसमन्ये मत्वा भयंकराः ५३
सिंहव्याघ्रास्तथा रौद्रास्तथा गर्जंति दुःसहाः ततः पापान्विता लोकास्ताडिता दुःखभागिनः ५४ तथैव च मया दृष्टाः पा
पिनो ये च ताडिताः रुदंति घृणिनो वाक्यैर्हे विधे किं मया कृतं ५५ इति नासिकेतोपाख्याने नरकवर्णनो नाम सप्तमोऽध्या
यः ७ नासिकेत उवाच श्रूयतां यन्मया दृष्टं महद्वै रोमहर्षणं ब्रह्मघ्नास्तत्र मे दृष्टाः गोघ्नाश्च पितृघातकाः १ मातृघ्नाश्च
स्वसृघ्नाश्च पुत्रघ्ना गर्भपातिनः मित्रविश्वासघाती च तथा वै वालवृद्धयोः २ दोषग्राही महापापी तथैव गुरुतल्पगः स्वामि
घातिनो दृष्टा नराः दुःखेन पीडिताः ३ व्रतच्छेदकराः पापाः पितुर्द्रोहस्य कारकाः परदाररता ये च परद्रव्याभिलाषिणः

४ स्वब्राह्मणपरित्यागीसाधुवृत्तास्तथास्त्रियः त्यजंतिमीनघातीचवनेदावाग्निदाहकाः राज्ञांविनिंदकानित्यंजनाश्चधर्मनिं
दकाः सदाव्यसनशीलाश्चनपोषंतिचसेवकान् कूटसाक्षिप्रदातारोदुःखितेषुचरोषिताः परनिंदारतायेचदुःखंदत्वाचहृ
षिताः ७ पापेषुचरमंतीहसत्यशौचविवर्जिताः धूर्ताश्चकुलघाताश्चवार्द्धुष्येचोपजीविनः ८ परस्त्रीगृहहर्तारोदेवद्रव्या
पहारकाः छिंदंतिचमहावृक्षान्क्षेत्रसीमाविलंघकाः ९ दयाहीनादुराचारावर्णाधर्मपराङ्मुखाः महापातकसंयुक्तायेच
दुःसंगसंयुताः १० नशृण्वंतिगुरोर्वाक्यंशास्त्रवाक्यंतथैवच हाहाभूतादुराचारादानधर्मविवर्जिताः ११ एतेवैदक्षि
णोद्वारेदृष्टामेपापिनोनराः पापिनोन्येचवहवोमयादृष्टाःसुदुःखिताः १२ इतिनासिकेतोपाख्यानेयमपथवर्णनो
नामाष्टमोऽध्यायः ८ नासिकेतउवाच अथाज्ञाकिंकरेस्कारिधर्मराजेनधीमता आनीयतांदूतपापंवध्वाकंठेच
शृंखलैः १ विचारोऽस्यमयादृष्टःश्रूयंतांद्विजसत्तमाः तत्रतिष्ठंतिवैप्राज्ञाःशुभाशुभविचारकाः २ तत्रदिव्यासभा
रम्याऋषीणांज्ञानिनामपि यत्कृतंमानुषैर्मर्त्येपुण्यपापादिकंचन ३ तत्सर्वंतत्रमुनिभिःकथ्यतेचमहात्मभिः ति
ष्ठंतितत्रऋषयस्तथैवसनकादयः ४ कृष्णद्वैपायनश्चैवजातुकर्णिर्महातपाः भारद्वाजोदधीचिश्चसंवर्तोगौतम
स्तथा ५ दुर्वासाऋषयोन्येचमरीचिर्भृगुगालवाः सनत्कुमारश्चात्रिश्चपुलस्त्योभृगुरेवच ६ भासुरःसुप्रभासु

ना के श्चयाज्ञवल्क्योमहामुनिः विश्वामित्रश्चमांडव्योगौतमश्चांगिरास्तथा ७ हरिमित्रःसुमित्रश्चईश्वरश्चमहाप्रभुः एतेच।
१५ ऋषयःसर्वेदृष्टाःसदसिचापरे ८ यमेनसहिताःसर्वेधर्माधर्मविचारकाः वस्त्रैरावेष्टिताःसूक्ष्मैःपद्मरागविभूषितैः
९ द्वादशादित्यसंकाशाः श्रुतिमीमांसपाठकाः वेदव्याकरणादीनिशास्त्राणिविविधानिच १० उदाहरंतितेसर्वे
इहकर्मचयत्कृतं तेषांमध्येधर्मराजःस्थितस्तत्रवरासने ११ मुकुटेनविचित्रेणमणिकांचनभूषितः द्वादशादित्य
संकाशः कुंडलांगदहारभृत् १२ दंडहस्तोमहाकायोमहिषासनसंस्थितः व्यापादयतिपापानांशास्त्रेणेवय।
थोचितं १३ यमदूताश्चतेसर्वेनरकेक्षिप्यंतिपापिनः शासनंकुर्वतेतेषांकोपस्यारक्तलोचनाः १४ ततस्तेनिर्दया
दूतास्ताडयंतिवदंतिच किंत्वयापापकर्माणि कृतान्यपिमहांतिच १५ तेषांपापफलंभुंक्ष्व पतत्स्वयमनुष्ठितं ए
वंदृष्ट्वामयातत्रधर्मराजसमीपगाः वदंतिसंमताःसर्वेधर्माधर्मविनिश्चयं इतिधर्मसभारम्याविचित्रामरशोभिता
१६ सुरूपास्फटिकाकाराऋषयोदीप्ततेजसः दूताब्रुवंतिवाक्यानिशासनेयापिनंप्रति १८ अयंपापीधर्मराज।
कुंभीपाकेषुनीयतां ब्रह्मघ्नंचापिशास्त्रोक्तंकुंभीपाकेषुपच्यतां १९ अनेनपूर्वंनिहतोद्विजःपापेनपापिनामदा
त्मापापमस्येहदृढंदंडेनताड्यतां २० नीयतांतमंभांडेवेकुंभीपाकेसुदुःसहे अपरेत्वतयाप्रोक्तंमुनिभिःश्रूयतां

वचः २१ गोहत्याचकृतायेनरौरवंनरकंक्षिप स्त्रीघातीगर्भपातीचतैस्तयंत्रेणपीड्यते २२ गुरुघातीस्वामिघातीक्षुर
धारेणोछिद्यते विश्वासघातकश्चैवकालसूत्रेचक्षिप्यते २३ घातकंबालवृद्धस्यतैलपाकेषुपच्यते क्षेत्रदाराप
हारीचसीमांभंजनद्रोहकः २४ छिद्यमानश्चक्रकैश्चगुडपाकेषुपच्यते वहवःशृंखलैर्वध्वायमस्याग्रेचसंस्थि
ताः २५ शासितामुनिवाक्यैश्चधर्माधर्मविचारणात् चित्रगुप्तोमहातेजास्तप्तकांचनसन्निभः २६ लिपिंकरोतिसत
तेसत्वानांकर्मणाकृतं चौर्योपजीविनःकेचिद्दह्यायेम्लेच्छपारताः २७ अपेयपापिनःपापास्तथैवानृतवादिनः
अगम्यागामिनोयेचअभक्ष्यंभक्षयंतिये २८ एवंपापादुराचाराःक्रोधलोभेनपीडिताः नीयंतेहिदुराचारास्तस्मिं
स्थानेभयंकरे २९ एकाक्षरप्रदातारंयोगुरुंचनमन्यते सयातिनरकेघोरेयस्मान्नायातिवैक्वचित् ३० वस्त्रापहारी
दुष्टात्मानाम्नकांस्यापहारकाः कन्यादानेचमूढात्मायस्तुविघ्नंसमाचरेत् ३१ रौरवेचमहाघोरेनकेपच्यते चिरं
दानेनदीयमानेनयस्तुविघ्नंसमाचरेत् ३२ ब्रह्मचारिव्रतीनांचतपोविघ्नंकरोतियः स्वमीक्षतेनृणांसोपियिअसि
पत्रेश्चछेद्यते ३३ दानंनिवारितंयेनमित्रघ्नंपापिनंतथा नीयंतेकटिभेदेनअंगारेषुचभर्ज्यते ३४ नरकान्निर्गम
नास्तैवेपच्यंतेवैकुयोनिषु पुनर्योनिसहस्रेषुभ्रमंतेपापकर्मणा ३५ वालानांस्त्रीजनानांचवृद्धानांक्लेशदायकः

ना॰के॰ गुरुद्रव्यविनाशी च क्षिप्यन्ते कृमिसंकुले ३६ राजा च पापकर्मा यः युक्तायुक्तविवर्जितः यो न्यायमन्यथा चक्रे करपत्रेण
१६ छिद्यते ३७ अदृष्टस्य च वक्तारं नेत्रोत्पाटनमेव च अश्रुत्वाद्भुतवादस्य कर्णौ तौ छेद्यतामपि ३८ नित्यं पानरतो य
श्च अवीचिनरके क्षिपेत् यो वै भुनक्ति अस्नात आहुतीनां विना द्विजः ३९ विष्ठाकूपेषु पच्यन्ते यावदाभूतसंप्लवं येन
देवब्रह्मस्वधनमात्रं हरंति च ४० सूचीमुखे महाघोरे पच्यंतां ते दुरात्मनः परदाराभिलाषी च देवब्राह्मणनिंदकः
४१ यो धर्मशास्त्रविद्वेषी तीर्थं चैव न मन्यते शूलमारोप्यतां शीघ्रं श्वभिः काकैश्च भक्ष्यतां ४२ चिरभुक्ताश्च या नार्य
इष्टाः पूज्याश्च ये शुभाः त्यजेत यो दुराचारः करपत्रेण छिद्यतां ४३ इति नासिकेतोपाख्याने पापात्मशास्ति विचारो
नाम नवमोऽध्यायः ९ नासिकेत उवाच अपरं च मया दृष्टं महद्वै रोमहर्षणं शृण्वन्तु ऋषयः सर्वे यादृशं रोमहर्षणं १
नरकाश्च मया दृष्टा ज्वलंतस्तप्ततेजसः पापात्मानश्च दह्यंते विरूपाः पापकर्मिणः २ ऊर्द्ध्वकेशा महाकाया लोहस्फीतदंष्ट्रा
भयंकराः दृष्टा मे शृंखलैर्बद्धा आनीता यमकिंकरैः ३ दंडैस्तु हन्यमाना [illegible] विलपन्त्यातुरा बहु दूतैश्च [illegible]शिनाः पा
पैः पतिता भूमिमंडले ४ धावंतश्च मया दृष्टा गृहीतास्तैश्च निर्दयैः तत्र लोहम[illegible]माः योषिद्रूपाः सुघट्टिताः ५ अग्नि
ना ज्वलिता मध्ये आनीताः पापिनो नराः रे पापात्मका मूढाः परस्त्रीलंपटा भुवि ६ इमा हि योषितो ह्यत्र आनी

ताः कारौरो स्तुवः आलिंगयंतु स्वस्नेहात्सत्वरा दुष्टचेतसः ७ इति मोरव्यंत्वया सर्वं आनीतं पूर्वकारणात् पदाम
लिंगंते सोपि तदा दंडेन ताड्यते ८ एवं दृष्टास्तदा तत्र अनेकाश्च सहस्रशः हन्यमानाश्च निःशंकैर्विह्वलाभयव्याकु
लाः ९ तत्रैव यमदूतैस्ते वाध्यंते धर्मवर्जिताः मद्यपानरतायेच अभक्ष्यान् भक्षयंतिये १० महद्दुःखं ततस्तेलं पापयं
ति वदंतिते पीतमात्रेणते नैव दह्यमानाः पतंतिते ११ नीयमानास्तदा दूतैरसिपत्रवनांतरे पतंति तालपत्राणि गात्रे
छेदो भिजायते १२ मृताश्च पतिता भूमौ श्वासेनोत्थाप्य ते ततः ततऊर्द्धं प्रविशंति उत्थिताः प्रपतंति च १३ एवं वै छि
द्यमानाश्च दृष्टान्येच सहस्रशः कूटसाक्ष्यप्रदातारः कूटकर्मरताश्चये १४ नीयंते नरके घोरे दुरात्मानः शिरश्छिदः
प्राणिनो घातयेद्यस्तु तैलयंत्रे सपीड्यते १५ दुःखदायी नरो यस्तु व्याधिकूपे विनिक्षिपेत् घृतचौरो घृते पच्यंते लौ
हस्य चोरकः १६ दधिक्षीरमधुचौरा रुधिरे च विनिक्षिपेत् देवयात्राविनाशी च पूयशोणितमिश्रिते १७ क्षिप्यंते पा
पकर्मा च पाशैर्ग्रीवा नीयो जितः वाटिकोद्यानमारामं देवतायतनानि च १८ छेदयेद्यो दयाहीनो अस्थिचूर्णे च पा।
च्यते भोजने विघ्नकारी च पादत्राणापहारकः १९ वस्त्रचौरश्चयो मूढो यंत्रेणपरिपीड्यते भोजने विघ्नकर्तारो नराः
पापविमोहिताः २० स्नानपानानि भक्ष्याणि वर्जयंति बहूनि च ताड्यंते यमदूतैस्ते पापिनो विविधाश्चये २१ नैपितं वै।

ना॰के॰ वगछतिसंज्ञांप्राप्यातिदुःसहाः अग्निदाहीमहापापीगृहेवाप्यथवावने २२ तेनीतायमदूतैश्चमुद्गरैश्चाग्निभर्जनैः तत्ररज्वा
१७ दृढंवध्वास्तास्मिन्वृक्षेचलंबिताः २३ अन्यंतुकामयेन्नारीमदृशंरूपयौवनैः भर्तारंत्यजतेयातु अन्येसंगंकरोतिच २४
ज्वलंतमग्निसंकाशंस्तंभंलोहमयंतदा आलिंगयंतिदूतास्तांजिव्हाछेदश्चजायते २५ अगम्यगामीयःकश्चिदग्निकुंडे
सुपच्यते क्रूरचित्ताश्चयेपापास्तथैवकलहप्रियाः २६ द्विजंजयंतिवादेनअनृताःकूटभाषिणः भ्राम्यंतेनरकेघोरेहन्यमा
नास्तुमुद्गरैः २७ परद्वेषपरःक्रूरोदुष्टात्माधर्मदूषकः अदत्वानृतवादीचनिंदितंप्रतियाचते २८ एतेसर्वेमयादृष्टावद्धा
वृक्षेषुमुद्गरैः योहरेत्मणिकंरौप्यंसुवर्णाभरणानिच २९ सूक्ष्मवस्त्राणिचतथादेवतापत्तनाच्चयः कुंभीपाकेसुपच्यते ।
खंडंखंडंचछेद्यते ३० दूषयेत्सर्वशास्त्राणिदेवतागुरुब्राह्मणान् ।जिव्हाछेदोभवेत्तस्यपूयशोणितभक्षणे ३१ मिष्टा
न्नंस्वयमश्नातिनददातिद्विजोत्तमे वालेचैवतुवृद्धेचनपितृन्मन्यतेचयः ३२ ताडितामुद्गरैर्घोरैर्भक्षिताःसिंहसूकरैःवा
लाश्चैवतुवृद्धाश्चगुर्विणापातुरकन्यकाः ३३ संभोज्यातिथिभृत्यांश्चदंपत्योश्शेषभोजनं विप्राणांधर्मयुक्तानांकुल ।
शीलवतांसदा मानभंगःकृतोयेनब्रह्महागद्यतेध्रुवं ३५ इतिनासिकेतोपाख्यानेदशमोऽध्यायः १० नासिकेतउवाच
अपरंचमयादृष्टंमहद्वैरोमहर्षिणां शृण्वंतुऋषयःसर्वेस्थानमेकंतुदारुणं १ तत्रवक्ष्यामि यादृष्टाज्वलंतोदीप्ततेज

जस्मा पंच पंचयोजनविस्तीर्णउच्छ्रायाश्चैकयोजनाः २ हाहाकारोमहानुग्रस्तेषु चैवश्रुतोमया वद्धाश्चसंकुलैः याशैरवलंबं
नियायिनः ३ ताडितादंडपाशैश्चमुद्गरैर्लोहयष्टिभिः अपरश्चमयादृष्टोनरकंस्तप्तवालुकः ४ प्रज्वलन्नग्निसंकाशस्तत्रदह्यंतिपा
पिनः क्षुत्पिपासापरिश्रांतायमदूतैश्चपिडिताः ५ रुदंतिपतिताभूमौकृतांजलिपुटास्तथाविज्ञापयं तिदूतेभ्यःपापिष्टास्त
निराश्रयाः ६ पुनःपुनःश्चतेदूतैर्हन्यंतेलोहयष्टिभिःमुद्गरैस्तोमरैःकुंतैस्ताडितादंडयष्टिभिः ७ पतिताश्चैवनिश्चेष्टाःसंज्ञा
तेषुनविद्यते दृष्टाश्चपतितान्भूमौदूतास्तत्रैवसंस्थिताः ८ अहोपापादुराचाराःकर्मतद्गतचेतसा सुलभानिनदत्तानिया।नी
यान्यन्नमेवच ९ ग्रासमात्रंनदत्तंवैदेवद्विजवरादिषु नहुतंवैश्वदेवान्नंनदत्तंवायसादिषु १० आगतस्यनमस्कारोनकृ
तःपितृकर्मच नचाकिंचित्कृतंतीर्थेतोषितानैवदेवताः ११ एकाकिमिष्टमाशितंकिंत्वयानश्रुतावयं ततोवदंतिदूताश्चकिं
कराघोररूपिणः १२ क्षिप्यंतेकूपमध्येतुदह्यंतेपापकर्मणः तस्मिन्स्थानेमयादृष्टाःसर्वकर्मसुसाक्षिणः इंद्राद्याःदेव
ताःसर्वाःकथंमूढनपूजिताः परित्यक्तास्त्वयामूढविनाधर्मेणमुह्यति १४ एवंवदंतितेदूताःनिर्दयास्ताडयंतिच वेणुहस्ता
महाकायाभ्रमंतेयमशासनात् १५ पापिनांशासनस्यार्थंकर्मणांभुक्तिकारणात् इतिनासिकेतोपाख्यानेशांतिकरणो
नामैकादशोऽध्यायः ११ नासिकेतउवाच श्रूयतांयमपुरादृष्टंभयंसंसारसागरे नानाप्रहारघोरैर्नानावर्णविराणिराः २

ना०के तस्मिंस्तु दक्षिणे द्वारे नित्यं पश्यंति ते यमदूताः करालवदना दृष्टा नानाविधा मया २ कोकिलासु समारूढा महिषासनसंस्थि
१८ ताः अपरे च मया केचिद्गृध्रसारसवाहनाः ३ वानरेषु समारूढाः शृगालेषु च हस्तिषु मृगारूढाश्च दृश्यते धावंतो यमकिंकराः ४
दृश्यंते च महाघोराः महांतो रोमहर्षणाः दृश्यंते विकृता मूढाः उर्ध्वकेशा भयंकराः ५ नेत्रेष्वग्निशिखाज्वालाः कृष्णवर्णा महोद
राः महादीर्घा विरूपाश्च करालाः कठिनोदराः ६ केचिद्दीर्घास्तथा ह्रस्वा महास्थूलास्तथापरे मुखं वानरसंकाशं दूतानां दृश्य
ते नृणः ७ अपरे शृंगिणः केचिद्व्याघ्ररूपा भयंकराः खरोष्ट्रागजवक्त्राश्च भीषणा विततानना ८ रक्तनेत्रा महादंष्ट्रा रुधिरा
द्रेकराः सदा मुंडमाभरणा तेषां सर्पवृश्चिकसूकराः ९ कटिनीलपटावद्धाः कृष्णवासावलंबिनः पापात्मानोपि दृश्यंते स्थूल
हस्ताश्च किंकराः १० शक्तिदंडधराश्चान्ये गदामुद्गरधारिणः परेषां घातिनः केचित्पाशहस्तास्तथैव च ११ खड्गहस्ताश्च संन
द्धा लोहदंडधरास्तथा मुशलं धारयंति स्म भिंडिपालान् गदायुधान् १२ यमदंडं दर्शयंति सर्वतो घोररूपिणः धावंतश्च म
या दृष्टा दूता मिच्छेदने वने १३ कारणं वदते पापी त्राता तस्य न विद्यते अन्यत्तत्र मया दृष्टमसिपत्रवनं महत् १४ तत्रैव य
मदूताश्च घोरा दुर्दर्शना अपि दीर्घदंष्ट्रा दीर्घकंठाः कृष्णाङ्गा रक्तलोचनाः १५ तद्वृक्षाः खड्गपत्राभं पृथुलं सर्वतो महत्
ये कर्माणो दुराचारा दूषकाः कलहप्रियाः १६ क्षिप्यंते यमदूतैश्च असितालवनांतरे पतितैस्तालपत्रैश्च गात्रच्छेदो हि पा

यिनां १७ प्रलापं चक्रिरे तत्र खंडं खंडं च छेदिताः सृष्ट मात्रे ततो देहे वहुधा तत्र शास्यते १८ जरा मृत्युर्न वै तत्र क्लेश एव
च पापिनां १७ एवं वै क्लिश्यमानास्ते पापादृष्टा अनेकशः १९ कूटसाक्षिप्रदातारः कूटपापेन पीडिताः छद्मेनोपार्जते य।
स्तु चौर्य्यापापेन जीवति २० निःक्षेपस्य च हर्तारो ये च विश्वासघातकाः एते सर्वे मया दृष्टाः शृंखलैः कंठसंस्थितैः २१ अ
वलंवंति वृक्षेषु दुःखेन प्रलपंति च पतंति च महारौद्रे कृमिपूयसुपूरिते २२ तस्य पार्श्वे महाश्वानो दीर्घदंता वृहन्मुखाः भ
क्षयंति च यायिष्यान्मास मारायभूरिशः २३ छिन्ना भिन्ना पतंत्य ते ताल वृक्षात्फलं यथा देहे च पतिते तत्र भक्षिताः कृमि
संकुलैः २४ नीयंते कंठवद्धास्तु क्लिश्यमाना हि पापिनः निक्षिप्यंते महाघोरे दुस्तरे नरकार्णवे २५ कथं निस्तरते घोरे मा
नुषत्वे विमोहितः अंतस्थाने मया दृष्टः भीषणो मानसे महत् २६ कालस्थानं च कालश्च आत्मीयवलसंयुतः गच्छ शीघ्रं
महावाहो वध्यमानं च मानय २७ जयशब्दं ततः कृत्वा निःसृता यमशासनात् सन्नद्धास्तत्क्षणात्सर्वे शस्त्रायुधकरोद्यताः
२८ युद्धार्थं निर्गताः सर्वे कालस्तेषां च नायकः चंडमुंडाकरे खड्गं पाशं वामकरे तथा २९ असुरैः किंकराणां संग्रामोऽभू
दतिदारुणः सायकैरसितैः खड्गैर्वज्रमुद्गरयष्टिभिः ३० कुंतैश्च मुशलैः पाशैर्दंडैर्लोहमयैर्वरैः शिलाखंडैश्च पाषाणैर्धनु
र्भिर्वहुधाविधैः ३१ हस्ताहस्तैर्नखैर्दंतैर्वाहुभिर्मुष्टिभिस्तथा एवं प्रवर्तते घोरे निर्जिता दानवास्तदा ३२ किंकरैश्च महाघोरैः

नाके संग्रामेलोमहर्षणे कालाख्येनचपाशेनवध्वादैत्यंमहाबलं ३३ दंडमुद्गरघातेननाशंकृत्वाचतत्क्षणात् आनीतावध्यमानास्ते
१९ धर्मराजस्यचाग्रतः ३४ तेनदृष्ट्वायमःक्रुद्धो कालशास्तिंकरोतिच अथनीतःसुरश्रेष्ठचित्रगुप्तस्यवेश्मनि ३५ विचारयि-
त्वापापंतद्दूतैर्दानवकःपुनः कालसूत्रेविनिःक्षिप्यरवाग्रेतत्क्षणामेवच ३६ पातितोयमदूतेनमहारौरवरौरवेनिःक्षिप्तोदुःस
हघोरे अग्निकुंडेचदानवः ३७ कृमियोनिषुनीतोवैपापयोनिपृथक्पृथक् अनेनविधिनासर्वेतेदैत्यादुःखसंस्थिताः ३८
महर्षयोह्यहंमन्येसंसारेकोत्रसंस्थितः बलवांस्तिष्ठतेनात्रनयुवास्थविरास्थितः ३९ नक्षीणोवालवृद्धोपिकालोग्रस
तिसर्वथा वालाश्चयौवनस्थाश्चवृद्धानार्भगताअपि ४० सर्वेषांच सतेकालएवंभूतमिदंजगत् एवंभूतेषुभूतानिसर्वा
वस्थासुसर्वथा ४१ कोनदुःख्येतजातेषुकोनशोचतिवामृते येनराःपापयोनिस्था अल्पायुष्यास्तथापरे ४२ व्याधि
ग्रस्ताःसदातेवैदैत्येयानरकागताः संज्ञातभवनेचास्मिन्दीर्घापुर्वैश्रजास्तथा ४३ पापकर्मनिवृत्ताश्चयत्तेयादेवताभुवि
अपरंचमयाज्ञातंसम्यक्संसारसंस्थितं ४४ यथाहिपथिकःकश्चिच्छायामाश्रित्यतिष्ठति विश्रम्यचपुनर्गच्छेत्तद्वद्भूत
समागमः ४५ इतिनासिकेतोपाख्यानेकालदूतयुद्धंनामद्वादशोऽध्यायः १२ नासिकेतउवाच धर्मस्थानंप्रवक्ष्यामि
श्रूयतांमुनिपुंगवाः घृतक्षीरवहानद्योमधुनश्चसरांसिच १ वीणावंशविनोदाश्चसुप्रियश्चारुभूषणाः हेमकुंडल

वर्णा वै विविधारक्त भूषिताः २ तत्र धर्मप्रभावेन क्रीडयंति वरांगनाः तस्मिन्स्थाने तु भुंजंति दानानि विविधानि च ३ तत्प्रकोव
नवर्णा मासुरूपा धार्मिका नराः उच्चासनसमारूढाश्चामरैर्वेहुवीजिताः ४ सुगंधलेपालिप्तांगा नानाधूपैश्च धूपिताः
सेवकैर्भूषिताः सौम्यै नानाभोगसमन्विताः ५ दिव्यरूपध रास्त्रीभिः क्रीडंते धर्मलीलया वापिकूपतडागादिपा
नानि विविधानि च ६ निर्मलानि च दानानि दत्तानि ब्राह्मणादिषु अन्नादिवस्त्राभरणभक्ष्यभोज्यं तथाप
रं ७ भूमिगावो हिरण्यानि ददंते नरा तत्रैव धर्मस्तत्रैव प्रसादेन सुखस्थानेषु सर्वदा ८ आत्मशक्त्यनुसारे
णा कर्तव्यो वित्तसंचयः द्विजाय तु नमस्कारं कृत्वा वेश्मनि चागते ९ आगते च तथा दृष्ट्वा मतिथिं पुण्यपावने
आसने भक्तियुक्तो वै विश्राम्य मिष्टवाक्यया भोजनं च यथाशक्ति कंदमूलफलैरपि अतिथिः पूजितो ये
न पूजिताः सर्वदेवताः ११ भुंजंते विविधान्भोगान्कामितांश्च यथेप्सितान् जातापत्यो द्विजः सम्यगग्निहो
त्रं च कारयेत् १२ ऋतुकालाभिगामी च सर्वभूतहिते रतः दयासंयमशीलश्च नित्यं धर्मपरायणाः १३ द्विजः
स्वर्गमवाप्नोति मा विलापमनः कृथाः ते शूराः क्षत्रिया धन्याः शस्त्रपाणि कृताः परे १४ सत्यशीलरताः सम्य
क्प्रजानां पालने रताः वैश्यः सदा विनीतात्मा पशुपालनतत्परः १५ दानैः सत्येन संयुक्तो पस्तु लोकेषु

नाके खंवसेत् देवद्विजातिसंसक्तो द्विजानां कर्मतत्परः १६ सत्यवादी दयालुश्च शूद्रो दानेन शुध्यति दिव्यं विमानमारू
२० ढाः पश्यंति परमां गतिं १७ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा धर्मपराश्च ये आत्मधर्मं परित्यज्य येऽजनाः प
तिता भुवि १८ ——— तारयंति महात्मानः आत्मानं कुलमेव च नेमे दुःखं च पश्यंति यममार्गे गृहस्य
च १९ पंचयज्ञपराः शांताः क्रोधलोभविवर्जिताः ते सदानंदमापन्ना ये च भिक्षां ददत्यपि २० कामभो
ल्प गकरे स्थाने क्रीडंते तत्र धार्मिकाः गृहं ददति ये केचिच्छुद्धभावेन धार्मिकाः २१ ते यांति परमं स्थानं यत्र
हेममया गृहाः भुंजंते च रवोयत्र तत्र ते कल्पतःवासिनः २२ सुवेलावाप्यवेलावान्नदानं च कुर्वते स्वर्गे
क्रीडंति ते विप्रापवतीभिः सदावृताः २३ दधिक्षीरप्रदातारः सुरभीं लोकमातरं ग्रासमात्रमपि ग्रासं ये प्र
यच्छंति निश्चयं २४ स्वर्णमौक्तिकरत्नानि वस्त्राणि विविधानि च मणिप्रवालदातारः क्रीडंते सह दैवतैः २५
क्षेत्रं च विपुलं रम्यं सर्वधान्यसमान्वितं ददाति यो वै विप्रेभ्यो नीयते स्वर्गकामिकैः २६ उपानहौ तथा छ
त्रं शीततोयं च भोजनं अश्वयुक्तविमानेन क्रीडंते ह्यमरावती २७ उष्ट्राश्वरथदानेन गवां वै हस्तिनां
तथा नीयंते परमं स्थानं गंधर्वैः सहमोदते २८ यो ददाति गृहं पुण्यं सत्पात्रा धर्मसंयुतः स जातो मर्त्ये।

लोकेवैशेषाश्चोदरपूरकाः २९ कन्यादानंकृतंयेनरोपित्ताधर्मतोद्रुमाः नाश्नंतिदुहितादत्तंप्राणैःकंठगतैर
पि ३० तेनदत्तंजगत्सर्वंत्रैलोक्यंसचराचरं क्रीडंतेस्वर्गवासेनकल्पमेकंनसंशयः ३१ विनादानात्कथंप्रा
प्तिः स्वर्गस्यचधरामराः सदाधर्मविहीनस्यदिनान्यायांतिसंक्षयं ३२ इतिनासिकेतोपाख्यानेकर्मवर्णनंना
मत्रयोदशोऽध्यायः १३ नासिकेतउवाच अपरंतत्रवैदृष्टमीशान्यांदिशिसंस्थितं रमणीयंमहास्थानंध
र्मराजेनभाषितं १ अहोदूताश्चयेकेचिद्धर्मशास्त्ररतानराः नतेवद्धाभवंत्यत्रईशान्यांनीयंतोध्रुवं २ आ
श्विनेकार्तिकेचान्नंपोषमाघेतथैधनं ज्येष्ठाषाढेचापानीयमीशान्यांनीयंतेसदा ३ मेषकर्कटयोर्मध्येय
दानपतिभास्करः पानीयंपलमेकंतुसुवर्णफलमुच्यते ४ वसंतेफलदातारःस्थानेस्थानेषुसंभवाः तेनरा
स्तत्रगच्छंतियत्रसूर्योपमोरथः ५ दुर्भिक्षेचान्नदातारःसुभिक्षेचहिरण्यदाः स्वर्गेषुभुंजतेभोगान्वैवान्हि
दानाहिमालये ६ त्रयस्सदासुनाःस्वर्गेअल्पेनतपसानराः जलदोविष्णुभक्तश्चब्राह्मणानांचिकित्स
कः ७ सर्वेतेरथमारूढाःशोभंतेदिविदेववत् हंसयुक्तास्तथायांतिचक्रवाकोपशोभिताः ८ अश्वैर्गजैर्वि
चित्रैश्चमयूरैस्सारसैरपि तत्रधर्मानुसारेणक्रीडंतेदेवरूपिणः ९ मुक्तावरधरारम्याअनेकेपिसहस्त्रशः

नाके तप्तकांचनवर्णाभाः शुद्धस्फटिकनिर्मलाः १० महारूपधरारम्या दिव्याः कन्यामनोरमाः सेवंते तेन रास्तत्र ।

२१ ।।। दिव्यपुष्पैरलंकृताः ११ सिंदूरसदृशाः केचिन्नीलमेघसमप्रभाः नानावेणुविचित्राश्च कंठामरणभूषि

ताः १२ पताकाध्वजसंयुक्ता अर्द्धचन्द्रविभूषिताः रत्नमालाप्रलंबैस्तेज्योतिर्दीपशिखोपमाः १३ तत्रते

गीतसंयुक्ताः सदा तिष्ठंति मानवाः नृत्यवादित्रसंयुक्ता निवसंति च धार्मिकाः १४ स्थापिता धर्मराजेन पुराण

ना कारणेन नृपाः आरूढास्ते विमानेन येन येन कृतं शुभं १५ धर्मस्य कारणं वक्ष्ये धर्मवार्तां तथा द्विजाः अन

ड्वाह स्वयं दत्ताः सूर्यलोके वसंति ते १६ वासोदाताचंद्रलोके अग्निलोके च हिरण्यदः । शिवभक्ताः शिवस्था

ने यत्र वै पार्वतीप्रियः १७ तस्य मुक्तिः कथं सम्यग्दानं यो न ददाति च इति नासिकेतोपाख्याने धर्मविचारो

नाम चतुर्दशोऽध्यायः १४ नासिकेत उवाच दृष्ट्वा तु नरकं घोरं महद्रोमहर्षणं पापिनो यत्र पच्यंते यम

दूतैः स्वयं आवृताः १ धर्मस्थानं पुनर्दृष्टं धर्मात्मा पवित्रा विष्टानि तत्र पुष्पोदका नाम पुण्यतोयाः सुखावहाः २ सु

वर्णवालुकास्तत्र फलिनस्तु सदा द्रुमाः पुष्पैश्च शोभिता वृक्षाः सिद्धा गंधर्वसेविताः ३ क्षीरोपमानि तोया

नि वहंते सामृतोदकं तस्यास्तीरे मया दृष्टा भूमिरत्यंत शोभनं ४ तस्मिन्मनोरमे स्थाने क्रीडंते धर्मप्राणिनः सेव्य

तेच सदा दिवैद्धर्मात्मानो महातयाः ५ महासौख्यकरस्थानमुद्यानं सरस्तटे सुगंधवासिताः सर्वे मारुताश्चामनोपमाः ६
सिद्धगंधर्वनिलया अप्सरोभिस्तथैव च यक्षैश्च बहुभिर्लोके सव्यंतेसामहानदी ७ स्त्रियश्च दिव्यरूपाश्च तस्यां सं
रेवसंतिताः नानावस्त्रधराः सर्वाः नानारत्नविभूषिताः ८ गर्विताश्चोग्ररूपास्ताः मनसोहर्षदायकाः संपूर्णचंद्रवद
ना आकर्णायतलोचनाः ९ निर्मिता धर्मराजेन क्रीडार्थं धर्मिणां चवै नृत्यगीतैर्मनोरम्यं ततस्थानं च शुभं भवे
वेत् १० देवार्चनसुनिष्ठायेये रतागुरुपूजने सर्वभूतदयायुक्ताः सर्वधर्मविशारदाः ११ त्रैलोक्ये चैव विख्याता ध
र्मराजस्य वेश्मनि दृष्ट्वाश्च बहवस्तत्र क्रीडंतः सरितस्तटे १२ न क्षुधा न पिपासा च न तापः शीतलं न हि न जरा दृ
श्यते नेत्र त्रदुख भावादिकं न हि १३ प्रियं ब्रुवंति ते सर्वे मनः प्रह्लादकारिणः इहजन्मनि ये कष्टं तप्यंति तप एव हि १४
न ते दुःखेन दह्यंति परलोके न थैव च पापात्मा च दुराचारो नित्यं कलहकारकः १५ दोषग्रहादिसुक्ताश्च भयं प्रा
प्नोति तत्रैव रे रे मूढा दुराचारा मानुषं जन्म दुर्लभं १६ कथं पापादिकं कुर्युः परलोके च दुःखदं इहजन्मसुखा
र्थाय कल्पं तेन नरकाय च १७ अचिरं तिष्ठते कायः किमर्थं पापमाचरेः श्रुतं मया यमप्रोक्तं शृणुध्वं द्विजपुंगवाः
१८ आहूताः किंकरास्तेन महायत्नेन वैतदा नीयतां च नरके यो नरः कूपमवल्लभः १९ इति वचनं निशम्य यो सौ

ना॰के॰ वदतियमः किलतस्यकर्णमूले परिहरमधुसूदनस्यभक्तान् प्रभुरहमन्यनृणांनवैष्णवानां २० कमलनयनवासु
२२ देवविष्णो धरणिधराच्युतशंखचक्रपाणे भवशरणमुदीरयंतियेवैत्यजभट दूरतरेणतानपापान् २१ इति नासि
केतोपाख्यानेपुण्योकनामनदीवर्णनोनामपंचदशोऽध्यायः १५ नासिकेतउवाच विष्णोकृष्णश्रीधरेत्यंतकालेजल्पन्
जंतुर्जीविनंयोजहाति पापान्मुक्तः कल्पते सोपिमुक्त्यै योवैस्वस्थः किंपुनस्तस्यलभ्यं १ सकृदुच्चरितंयेन हरिरित्य
क्षरद्वयं बद्धः परिकरस्तेन मोक्षस्यगमनंप्रति २ अथातः संप्रवक्ष्यामियमलोकस्यकारणं पथः संख्याप्रव
क्ष्यामिशृणुध्वंद्विजसत्तमाः ३ षडशीतिसहस्राणियोजनानांप्रमाणतः यमलोकस्यचाध्वावैयत्रगच्छंतिप्राणि
नः ४ तस्मिन्मार्गेमहाघोरेज्वलंतश्चाग्नितेजसः घोररूपामयादृष्टाभ्राम्यमाणास्तथाचैतैः ५ क्वचिन्मार्गेहिरौद्रास्ते
विकटपर्वतं क्वचित् तीक्ष्णकंटकंसंकीर्णसूचीवक्त्रंसुदारुणं ६ रौद्राकारोमहाघोरस्तथानप्रवालुकंः पिपासा
हिमशांतेचएवमादौसुदुर्गमे ७ नीयंतेचभयार्ताहिप्रेतैः सर्वेनरादयः विनाधर्मेणतेपापादुर्गाणिप्राप्नुवंतिहि ८
क्रूरैस्तैः किंकरैःसर्वैर्बद्धादृष्टाश्चशृंखलैः शासितालोहदंडैश्चपतिताधरणीतले ९ उत्पातयंतितेदूताआकृष्यं
तेचसंखलैः ग्रीवाबाहुषुपल्लेनबद्धाः पृष्टेप्रयत्नतः अनेकाश्चमयादृष्टास्तस्मिन्मार्गेचपापिनः यमदूतैर्महाघोरै

निर्द्दयैस्ताडिताभृशं ११ दंडमुद्गरहस्तैश्च ताडिताः प्रलयंति च मूर्छितास्सराभूमिस्था उत्थिताभयशंकिताः १२ स्मरंति पापं ये याव च्चता
वत्ताडयंति मुद्गरैः वदंति करुणा वाचस्तानाते षां न विद्यते १३ दूतास्ते षां वदंत्येवं श्रूयतां मुनिपुंगवाः पापक ॥०
मसदासक्ताः सर्वधर्मबहिःकृताः १४ भोभोपापादुराचारामानुषत्वे च योजिताः सुलभानि न दत्तानि इंधनान्युदकानि च'
५ लक्ष्म्या च गर्विता मूढागतं जन्मनिरर्थकं न गतातीर्थराजं दृष्टपूजितानैव ब्राह्मणाः १६ मूढ किंचिन्नकृतं देयपथ्यानं तर
गेवा थं न श्रुतोयमलोकस्ते महापंथाहि नश्रुतः १७ मैथुने वासनासक्ताः सर्वकालेष्वशंकिताः कामभोगेषुसंयुक्तोयुक्ता
यक्तं न चिंतितं १८ न मूर्हिरण्यं दत्तं वै न गावो न तथा तिलाः ग्रहणे च चंद्रसूर्ययोस्त्वसुप्तोसि सुखेच्छया १९ न हुतं न त्वया
यातं नाराधि मधुसूदनः दुस्तरं कथं तरस्से यममार्गं सुदारुणं २० सत्वरं गच्छ पापात्मधर्मज्ञानविवर्जितः सर्वकर्मपरिभ्र।
ष्टो न भक्तिर्द्विजदैवते २१ गुरुवाक्यं न श्रुतं च त्वया वै गर्वितात्मना अनेन विधिना यांति मया दृष्टास्त्वनेकशः २२ ब्रह्म
घ्नश्च सुरापश्च कृतघ्नस्वामिघातकः स्त्रीघाती गर्भघाती च गृहक्षेत्रहराश्च ये २३ सक्ता ये परदारेषु नित्यं दूतपरताश्च ये
व्यसने मद्यमांसेषु वर्णसंकरकारकाः २४ अगम्यागमने ये च अभक्ष्याभक्षणे रताः ये चोरयंति गुरुद्रव्यं देवद्रव्यं विशे
षतः २५ स्त्रीद्रव्यहरणे यस्तु बालद्रव्यं हरेच्च यः बाधिरांधकविकलक्लीबद्रव्यहराश्च ये २६ वृत्तिघ्नश्चापकारी च क्षेत्र

नाके दारापहारकाः प्रछन्नपापा ये कुर्युः सुरापानं द्विजोत्तमाः २७ गर्भहा कालघाती च विषदानकरास्तथा नीचाचाररता नित्यम
२३ धर्मे चिंतयंति ये २८ पापकर्मरता ये च सत्यशौचविवर्जिताः यममार्गे मया दृष्टा रोदमाना बृहत्स्वरैः २९ ज्वलंतमग्निसंका
शं पंथानं दुरतिक्रमं नीयंते पापकर्माणो दुराचारा अधार्मिकाः ३० क्षुधातृष्णावतप्तांगा विनयंति च किंकरान् वदंति कृप
णं वाक्यं मया दृष्टा अनेकशः ३१ अस्ति कुत्रैव सलिलं महातृष्णाप्रपीडिताः एवं वदंति ते दूतान् नीयमानास्तु किंकरैः
ततस्ते कुपिता दूता घ्नंति तोत्रैर्महामुद्गरैः आकृष्यमाणास्ते रसा वमंति शोणितं मुखात् ३३ दूत उवाच संसारे तु कृतं कर्म
इह स्यान्ने फलप्रदं न गा वस्त्रं त्वया दत्ता वैतरण्यास्तु तारणं ३४ एवं वदंति ते दूता बद्धान्वै शृंखलैर्गले दुर्गमे तन्महामार्गे
मया दृष्टास्त्वनेकशः ३५ ततः पापा मया दृष्टा विकला धर्मसंग्रहे कथं निस्तरते सम्यक् संसारं द्विजसत्तमाः ३६ अथ
य ऊचुः कथयस्व यथा विप्र दृष्टा संख्या च तत्पथः कथं वा सो भवेत्तत्र केन दानेन मुच्यते ३७ नासिकेत उवाच अ।
लं वदामि भो विप्रा मृत्युसंसारसागरे सर्वे वैतरसा नूनं मृत्योर्गोचरमागताः ३८ विमुखा बांधवा यांति धर्मस्तमनुग
छति शयाने च निवर्तंते ये के चित्स्वजना जनाः ३९ ततदा वै पिता माता भार्या पुत्रास्तथैव च भगिन्यो भ्रातरश्चै
व ये चाभीष्टास्त्व बांधवाः ४० हिरण्यादिधनं चैव ग्राममहिष्यादिकं तथा परित्यज्य इदं सर्वं पुराण्यपापैः समन्वितः ४१

पथितस्मिन्महाघोरे वर्त्तते भयकारिणि नीयंते पापकर्माणस्तस्मिन्मार्गे भयावहे ४२ असत्यायेनरादुष्टाः क्रोधलोभेन मोहिताः अथवक्ष्या
म्यहं घोरं यममार्गस्य निर्णयं ४३ क्षुरधारासुसंकीर्णः सूचीवक्त्रैः सुदारुणः कालरात्र्याच संयुक्तो दुस्तरं घोररूपिणं ४४ यत्रैव वसतो धर्मो ज्व
लितश्चाग्नितेजसा धर्मात्मा देवकार्येषु पापात्मा घोररूपिणां ४५ निःक्षिप्यंते यमलोके भुंजंति च शुभाशुभं यत्राधमो मया दृष्टो यमस्थाने हि द्विजो
त्तमाः ४६ पुण्यात्मनां सौम्यरूपक्रूरः पापात्मनां सदा एतन्म निर्दयं दृष्टं धर्मराजस्य कौतुकात ४७ धर्मराजपुरी रम्या निर्मिता ब्रह्मणा पुरा ब्रतिः
नियमस्थिता येच ब्रह्मचर्यकल्मषाः ४८ नेतत्रसुखसंस्थाश्च दुःखिताः पापकर्मणः अत्रदानानि दत्तानि हेम
रूप्यं च भूमिगाः ४९ उपानिषत्ति द्रव्याणि तुरंगादीनि यानि च तत्र मार्गे लभंते वै यानानि विविधानि च ५० हस्त्यश्व
रथयानानि भोजनाच्छादनानि च पूर्वमेव तु यैर्दत्तमुपतिष्ठंति तत्पथि ५१ अन्नोदानानि दिव्यानि भुवि दत्तानि यैर्न
रैः योजनानां सहस्रं च क्रूराकारो महापथः ५२ रौद्रो भयानको मार्गो विपुलस्तत्र वै भवः एवं मार्गो मया दृष्टः कथ्यना
ज्ञापते भयं ५३ ततः पंच सहस्राणि योजनानां प्रमाणतः कंटककुलैः संकीर्णः सोष्णा ग्रश्चातिदुर्गमः ५४ द्वि
सहस्रं महा तुष्णं वालुकायोजनानि च ५५ उपानह प्रदातारः सुखं यांति महापथि तत्रश्चाष्टसहस्राणि योजना
नां प्रमाणतः ५६ अग्न्यागाराः पथि तत्र ज्वलंतश्च दिशोदिश वापीकूपतडागानि प्रयादत्ताश्चयैर्नरैः ५७ वटादिरो

ना॰के॰ रोपितं मार्गे देवतानां भवनं तथा तत्र ते सुखिनो यांति वारुणो ज्वलनेन तथा ५८ योजनानां सहस्राणि दशपंचाधिकं ततः कृ।
२४ ष्णाघोरा महारात्रिः कालरात्रिरिवोद्यता ५९ तिमिरेणासमाकीर्णां गंतुं तत्र न शक्यते दीपदानप्रदातारः सुखं यांति म।
हापथे ६० कार्त्तिके माघमासे तु वैशाखे विषुसंनिधौ ज्वलंति दीपकं यस्य अहोरात्रे च ये नराः ते द्योतमाना गच्छं
ति यम मार्गे यमालये तुलसीकानने दीपं तथा विष्णोश्च मंदिरे भवान्यास्त्वालये ब्रह्मास्त्यास्तथा माहेश्वरे मठे गंगा
यमुनयोः स्थाने तथा सरस्वतीतटे ६३ नित्यं ब्रह्मालये स्थाने कुर्वंते च अहर्निशं ते नराः सुखिनो यांति घोरे महाप
ढिज्ञाः ६४ तस्माद्वै दीयते दीपो मृतपृष्ठे च सर्वथा अग्रे दीपः प्रचलति प्रेतो गच्छति पृच्छति ६५ तत्र वैतरणी दु
र्गा गर्जमान महारवा तत्र धेनुप्रदातारः स्तरंते तां महानदीं ६६ अश्वदानेन दिव्येन गजदानेन मानुषाः अंतरि
क्षे हि गच्छंति तस्मिन्मार्गे भयावहे ६७ यैः पूजिता देवतास्तु तोषिताः पितृदेवताः दानानि तत्र दत्तानि सुखं यांति म
हापथे ६८ योजनानां सहस्राणि जलकीर्णो महापथः योजनानां सहस्रं तु पंचविंशतिकीर्तितः अतिकष्ट
रस्तत्र मया दृष्टो हि दुर्गमः तस्मिन्मार्गे महाघोरे दंशं व्याकुला नराः ७० क्षुत्पिपासामहातप्तास्तांतभीष।
णोर्नराः पारं गच्छंति नित्यं ब्रह्मन्नत्र दानेन तत्र वै ७१ यमलोकस्य मर्यादा वैतरण्या विना प्रभो अथ क्रमेणाग

छंनिसंतप्ताश्चनदीतटे ७२ शतयोजनविस्तीर्णामहापारामहानदी पूयशोणितसंपूर्णासर्प्यवृश्चिकदूषिता ७३
वहन्त्यानत्रदुर्गंधिःशतावर्ताभयानका जंतवश्चमहादंष्ट्राभक्षयंतिहिपापिनः ७४ दुस्तरादुर्गमाचैवविशेषा
त्पापकर्मिणां तत्रैवताडितेदूतैःसबलैर्लोहयष्टिभिः ७५ प्रविशंतापविशंतोदूतास्तान्ब्रुवंतियमालयेनत्वया
ब्राह्मणोदत्तेनहृतंहव्यकव्ययोः ७६ आतिथ्यंनकृतंपापिन्सदास्वभरणोरतः संक्रांतौचव्यतीपातेग्रहणेचं
द्रसूर्ययोः ७७ अमावस्यापूर्णिमायांनकृतंपितृतर्पणं तिलधेनुगनौवाजिअन्नानिविविधानिच ७८ रसानि
यानिभूर्लोकेस्वयमुत्पाद्यभक्षितं इदानींहिमहामार्गेकथंतेनिस्तरोभवेत् ७९ नयमोयमलोकश्चनदूतानचाकि
ङ्कराः नश्रुताश्चत्वयापापकथ्यमानामहाशये ८० यत्रसाधुस्थितापुराणाकथापौराणिकीशुभा नगतोसिम
हापाप कथंनिस्तरसेधुना ८१ धनार्थीगतबुद्धिस्त्वंधावसेचमृगोयथा भार्याममेयंपुत्रोयंसुहृद्धिमवबांधवाः
८२ ममेतिब्रुवसेपापिन्पशुद्रव्येचनित्यदा यत्रसुधार्मिकाः लोकाःसुशीलादानसंयुताः ८३ नदत्ताश्चत्वया
गावःस्पर्श्यतांमाविलंव्यतां तस्मात्सुतारणार्थायकृष्णांधेनुंप्रदापयेत् ८४ अन्नदानंचयेदत्तंतेनत्तरंतिमहानदीं तीर्थ
स्नानेचयेसक्तागंगासागरसंगमे ८५ शास्त्रवेदेअधीतारोनित्यंचैवदृढव्रताः सत्पात्रेयेप्रयच्छंतिदानधर्मरतानराः ८६

ना॰के॰ तेपिमार्गेमहाघोरेवैतरण्यायाश्चनिर्भयाः क्षणेनलग्राधेनोश्वपुछकेनतत्रतेसुखं ८७ मयादृष्टाः प्रविशंतोवैतरिण्यांसहस्रशः
२५ तत्रयोधर्मशीलश्चपश्यतेहिमसन्निभां ८८ रथ्याहयास्तथाशुभ्राः शुद्धस्फटिकसन्निभाः पापात्मानस्तत्रदुःखाः पश्यं
ते दारुणां नद्यां ८९ अग्निकुंडेकृमिकूपेतत्रदूताभ पानकाः शुभंवाचाशुभंवापिगृहीत्वातत्रभुज्यते ९० किंकरा
श्चमहादुष्टापथ्यायोग्यंपंचकुर्वते भोभोद्विजामयादृष्टाः श्रुतंचबहुधामया ९१ धर्मस्यास्तत्रतिष्ठंतिविविधधर्मेणानिश्च
लाः वस्त्रादिकंचकौशेयंधातुहोमादिकंतथा ९२ शय्यादिरत्न माणिक्यंयद्दत्तंतत्रलभ्यते इहलोकेभवेत्कीर्तिः पर
लोकेसुखावहः ९३ धर्मः पवित्रमतुलंधर्मोहिमहतांधनं ९४ धर्मोबंधुरधर्मएवचरिपुर्धर्मः सखासौख्यकृद्धर्मोच्चैर्हृप
रत्नकोनिराखिलाधर्मोधनंवैस तां धर्मोध्वांक्षविनाशनेचविहितोधर्मोहिसर्वप्रदः धर्मोत्स्वर्गजयापवर्गमखिलंसत्यं
मयात्वोदितं ९५ इतिनासिकेतोपाख्यानेमहामार्गवर्णनोनामषोडशोऽध्यायः १६ नासिकेतउवाच धर्मिष्टानांप्रवक्ष्या
मिशृणुध्वंद्विजसत्तमाः निर्मलंकोमलंमार्गेरमणीयंचसौख्यदं १ महावृक्षघनछायंपुष्पितंगंधवासितं वापीकूप
तडागेषुसपद्मंवारितत्रवै २ दधिक्षीरमहानद्योमधुभोज्यंफलानिच विमानेषुसमारुह्यपंथानंयांतिधार्मिकाः ३ दीर्घमा
र्गंचगच्छंतिभोगेनविविधेनते इहेवयेनदत्तानिपरलोकेहिभुज्यते ४ अथान्यत्संप्रवक्ष्यामियद्दृष्टंकौतुकंमयासंस्थितो

हंसभामध्येधर्मराजस्यवेश्मनि पतस्मिन्स्थानेरथारूढोद्वादशादित्यसन्निभः आयातोनारदोदेवोयमेनपरिपूजितः
६ दिव्यासनंप्रदत्तंचमनःसंतोषकारकं यमउवाचस्वागतंतेद्विजश्रेष्ठब्रह्मपुत्रमहामुने ७ अद्यमेसफलंजन्मअद्य
मेसफलाक्रिया अद्यमेसफलापूजातवदर्शनमात्रतः यमस्यवचनंश्रुत्वानारदोवाक्यमब्रवीत् ८ नारदउवाच आगतोहं
महाभागतवदर्शनलालसः कीदृशस्तवलोकोहिविचारस्तवकीदृशः प्रेतानांक्रियतेसम्यग्धर्मोधर्मविचारणा ९ नासिकेत
उवाच एवमाभाष्यवाक्यानिनारदोधर्मसत्कथां कथयनसददर्शाग्रेधर्मिष्ठानांचसत्पथं तत्रदेवाःसमायाताविमानेनसह।
स्रशः ११ मेघदुंदुभिनिर्घोषैरप्सरोगीतवाद्यकैः हस्तिघंटानिनादैश्चगजवाजिभिरेवच १२ मुक्ताप्रवालमाणिक्यभूषितैश्चपरैर्गु
णैः वादित्रंविविधंतत्रवीणावेशमनोरमं १३ ऐरावतसमारूढोदेवराजःपुरंप्रति आगतोवायुवेगेनयमोत्कुष्ठश्चतत्क्षणात् १४
धर्मराजोमहाराजःसत्वरंचस्ववेश्मनि प्रविष्टोभयसंत्रस्तस्तेदूताश्चदिशोदश १५ गताःक्षणेनपापिष्ठानिरताःक्रूरकर्मिणःप्रेता
स्तत्रैवमार्गेचसर्वेचाध्वनिवर्तिताः १६ विस्मयश्चपरंजातःधर्मराजसभांप्रति ब्रह्मपुत्रोविलक्ष्यैवंनावदत्तत्रकिंचन १७ तत्क्षणा
त्तेनमार्गेणतेसर्वेनिर्जराःपुनः ज्वलज्ज्वलनसंकाशागतास्तेचदिशोदश १८ क्षणेनैवागतोधर्मोभयार्तोनष्टचेतनः नारदउवाच
सत्यंब्रूहिमहाप्राज्ञविष्णुतुल्यपराक्रमं १९ असुरराक्षसाघोराःसर्वेतेवशसंस्थिताः त्रैलोक्यमखिलंसर्वंत्वपितिष्ठतिधर्मवै २०

नाके
२६

मम कौतुकमुत्पन्नं कथयस्व यथातथं कस्मात्त्वं च भयत्रस्तो वायुवेगेन निर्गतः २१ नारदस्य वचः श्रुत्वा प्रत्युवाच कृतांजलिः यम उवाच श्र
तिगुह्यं मुनिश्रेष्ठ कथ्यते पापनाशनं २२ श्रोतव्यं च प्रयत्नेन धर्मपुण्यप्रवर्धनं मर्त्यलोके महाराज श्रीमान्सत्यवाक् नरः २३ जनको नाम ।
विख्यातः अश्वमेधं पुराकृत तस्य राज्ये प्रवक्ष्यामि श्रूयतां मुनिपुंगव २४ स च धर्मपरो राजा नित्यं शांतो जितेंद्रियः प्रजानां वत्सल
श्चैव भीतानां च पालकः नक्रोधं च प्रकुरुते प्रजानां स नराधिपः प्रजानां रक्षको दक्षो देवपूजनतत्परः २६ पालयते सकलान्लोकान्
धर्मयुक्तो दयापरः गावश्चैव बहुक्षीरा सदाम्नातफला द्रुमाः २७ धनवंतो जनाः सर्वे तज्जवतश्च धार्मिकाः एवं विधं महाराज्यं जनकस्य
महात्मनः २८ तस्य भार्या तु विख्याता नाम्ना सत्यवती शुभा सर्वलक्षणसंपूर्णा सर्वधर्मपरायणा २९ भर्तुश्च देवभक्ता च नित्यं धर्म
दृढव्रता पतिव्रता पतिप्राणा भर्तुर्वाक्ये सदा रता ३० सुखे भवति सुखीनि दुःखिते चातिदुःखिता तुष्टे च तुष्टिसंयुक्ता ह्यतुष्टे प्रियवादि
नी ३१ परिवारे समस्ते सा भुक्ते भर्तरि भुंजति एवं बहुगुणोपेता पत्नी जनकभूपतेः ३२ पतिव्रता महापुण्या सर्वभूतहिते रता ।
जनकस्य प्रिया भार्या धर्मकामादिसौख्यदा ३३ इत्थं विमानमारूढा प्रयाता सामरावतीं शक्राद्या देवताः सर्वास्तां नेतुं वै
समागताः ३४ पितामहेन सा राज्ञी प्रणीपत्य सत्कृता तदा विमाने स्थापिता सा पि गीतनृत्यादिशोभिता ३५ आगता मत्पुरे ।
सा च महादीप्ता पतिव्रता स्वपेणोग्रेण दग्धोऽहं तेनाहमुपआगतः ३६ ततो गृहांतरे चास्मिन्दूता अपि गता मम महा

सन्यामहाप्राज्ञाकथितासानपस्विनी ३७ एवंहिकथयामासनारदाययमोहिवै ततस्तेआगतादूताधर्मस्याज्ञानुकारकाः ३८
दूताऊचुः कथंशास्तिंकरिष्यामः कथंपापानुताडनं धर्मराजमहाराजभयंदत्तंतयाधुना ३९ अथधर्मोवदद्वाक्यंदूतानां
शस्त्रधारिणां धर्मराजउवाच माविलंवंकुरुध्वंभोपापानांताडनेषुच ४० यथायोग्यंतथाकार्यंश्रुत्वादूताविनिर्गताः स
त्वराःक्रोधसंतप्तापापदंडकरास्तथा ४१ ताडयंतिचपापिष्टान्निशंकास्तेचकिंकराः मुद्गरैर्निशितैःखड्गैःशक्तिभिर्यष्टि
भिस्तथा ४२ हन्यमानाश्चनीयंतेयमदूतैर्महावलैः धावंतोभयसंत्रास्तादिशोविदिशएवच ४३ एवंदृष्टामयातत्र
दृष्टाःस्वामिघातिनः यांतिवैतरणींघोरांशीर्णांगास्तेदुरात्मनः ४४ तत्रैतेताडितापापाःपिवंतिशुक्रशोणितं दुःकर्मणां
शासनंचवहंतिपापनिर्दयाः ४५ गर्जंतिचमहाघोरादुर्निरीक्ष्याभयंकरा कृमिपूयकलसंकीर्णावहुविष्टाप्रपूरिता ४६ म
हाघोराणिवहुलामहानक्रसमन्विता विश्वासघ्नाव्रनघ्नाश्चअन्येदुष्टोपचारिणः ४७ तन्मध्येपतनंतेषांत्राणाचैवनविद्य
ते येत्यजंतिपुरादारान्येधर्मान्सत्यवादिनः ४८ आत्मधर्मपरित्यागादुर्भिक्षेचपलायिनः स्त्रीवाक्यृश्चिकभक्षस्ते परदारर
ताश्चये ४९ व्रतभंगाआश्रमिणामलिंगालिंगधारिणः मिथ्यावादंयेवदंतिमायालोभसमन्विताः ५० वसंतेसुचिरंकालंते
वैतरणींनदीम् इतिनासिकेतोपाख्यानेनारदयमसंवादोनामसप्तदशोऽध्यायः १७ नासिकेतउवाच पुनश्चाहंप्रव

ना.के.
२७

ष्याभिधर्मोयेनकृतः सुभः यः पुरायसंयुतंकर्मकुरुतेयत्नतस्तुविः १ ससम्यक्प्राप्नुयाज्जन्ममानुषेवैभवेत्पुनः चतुराशीतिलक्षाणियोन
यः स्वप्रकीर्तिताः २ क्रमेणसर्वाः भ्रमतेनतोयातिमनुष्यतां अथवापिनरोयातिकदाचिन्मानुषींतनुं ३ तत्रापिपापंकुरुते आयुषःक्षय
णंचैवपुनस्तेनैवपापेननश्यंतेजन्मजन्मनि ४ गोहत्यांयेचकुर्वंतिचांडालास्तेभवंतिहि मार्गग्राहीपरेषांयोरोगेनपरिपीड्यते ५ ग
रुद्रोहीनृतवादीचदुःकर्मागुरुतल्पगः कुनखीसर्वाहारीस्यान्मूकश्चैवतथानृती ६ गुरुतल्पगमायेचगुरुभार्यांभजंतिये रमंतेस्व
छयापापाजायंतेसर्पयोनिषु ७ ब्राह्मणोवेदविक्रीताशूद्रयोनिषुजायते भाषतेभगिनींयस्तुका मक्रीडांकरोतिच ८ पां
डुरोगीभवेन्मूकोज्वलदंगः सदाभवेत् कन्याघातीमहापापीसर्पयोनिषुजायते ९ खरोवैवहुधाभूत्वाकाकयोनिषुजा
जायते अपरिक्षितभोजीचसूकरोविजनेवने १० मांसाहारीभवेद्यस्तुशृगालेष्वभिजायते निर्भयः पापकर्मभ्यो व्या
घ्रयोनिषुजायते ११ परस्त्रीरतिसंतोषीशूकरीष्वभिजायते अविद्यांपाठयन्पठेद्वृषभोजायतेनरः १२ अन्नंपर्युषि
तंविप्रेकुष्ठिरोगितांव्रजेत् धनहारीभवेदंधोजन्मांधः पुस्तकंहरेत् १३ फलानिहरतेयस्तुवानरोजायतेध्रुवंसदा।
कामीभवेद्यस्तुचटकत्वमवाप्नुयात् १४ पक्षच्छेदीभवेन्मर्त्यःकृमियोनिषुजायते वस्त्रचौरोपरद्वेषीरजकःसोभि
जायते १५ रत्नहारीचदुष्टात्मामौक्तिकानांप्रहारकः स्वामिघातीमहापापीपुरीषेकीटकोभवेत् १६ प्रतिश्रुत्यद्विजेभ्यो

२८ स्योर्थमदत्वा जंबुकोभवेत् अविक्रयंविक्रयेद्योविकटाक्षोभवेन्नरः १७ विवादयेद्द्विजैर्यश्च कच्छपोजायतेनरः धनहारीच
बधिरःश्मशानेगृध्रतांव्रजेत् १८ गृध्रान्मृत्युवशायातोमार्जारश्चभवेत्पुनः प्रजाहानिकरोयश्च काकोलासोभिजायते १९ स्त्र
न्यग्राहीचपुरुषःकीटकश्चभवेच्चिरं कार्यासमर्पिताकांस्यानिब्रह्मस्वंचहरंतिये २० उपानहौहेमछत्रंमत्स्यास्तेजल
वासिनः फलहारीचविंध्येषुकुंजरश्चैवजायते २१ अग्निंद्विजंस्पृशेत्पद्भ्यांपंगुर्जन्मत्रयंभवेत् सुरापानकरोविप्रः
श्वानयोनिषुजायते २२ परान्नहर्तामर्त्यश्चजायतेसर्पयोनिषु मृगयोनिषुगच्छंतिपापायोनिष्वनेकशः २३ मंत्रहीनाभवे
द्यस्य दीक्षाचैवद्विजोत्तम तेनदोषेणसोविप्रोमार्जारत्वंप्रपद्यते २४ छेदयेद्यस्तुवृक्षांश्चसपुष्पान्सफलान् तथा।
चातकोभवतिसोपिपश्चाद्भवतिकुक्कुटः २५ स्वगोत्रेयोभिघातीचस्वगोत्रांरमतेस्त्रियं ऋक्षयोनिषुजायेतयावद्वे
द्वार्कमेदिनी २६ कश्चिद्दत्तानिदानानिदानभंगंकरोतियः मातापितृगुरोर्द्वेषीधर्मशास्त्रार्थनिंदकः २७ तेपिगर्भे
छिनश्यंतियावद्वर्षसहस्रकं एकाकीमिष्टमश्नातिपुत्रभार्याविवर्जितः २८ मरुद्देशेभवेत्सर्पःशुष्केचकोटरेतरोः
मर्मग्राहीपरेषांयोरोगेणापरिपीड्यते घृतहारीभवेत्कुष्ठीनस्माद्दुष्टकृमिर्भवेत् अग्निंहरतियःशीतिपंगुर्जन्मत्रयंभ
वेत् ३० घंटावादित्रहारीयोघंटिकाघंटकोभवेत् तैलाहारीभवेत्तैलीतिलहारीचगर्दभः ३१ गंधपुष्पापहारीचमुखेद

नाके गंधनामिपात् अंबुहारीचकूर्मश्चजलजःसोभिजायते ३२ प्रछन्नंकुरुतेपापंसतुजन्मांधकोभवेत् तस्माच्चेहपरिभ्रष्टोदुःख
२९ शोकातुरोभवेत् ३३ नित्यंचक्रूरचित्तोपिनकुलश्चभवेत्किल परद्वेषकरःक्रोधीजलौकाजायतेचिरं ३४ अकृत्वावैश्वदेवंच
येभुंजंतिद्विजोत्तमाः वृथावैतेनपापेनकाकयोनिषुजायते ३५ निरर्थकलहंकुर्याद्द्वनेसमक्षिकोभवेत् भर्तारंवंचयेद्य स्त्री
जलौकाजायतेचिरं ३६ परस्यपरिवादीचसभवेद्वनशूकरः देवब्रह्मस्वहारीयःकृमसर्प्योगिरोभवेत् ३७ नाराधितेशिवलिं
गेब्रह्मविष्णुद्विजोत्तमाः नयेनपूजितादुर्गानतीर्थगमनंकृतं ३८ नहुतंनैवजप्तंचनदत्तंगुरवेब्राह्मणे आलस्येनगतं
जन्मनरकेपतनंध्रुवं ३९ देवार्चनरतायेचाप्यातस्नानरताश्चये दानधर्मरताःसत्याःस्तपःसंयमसंयुताः ४० इहजन्मनिधन्या
स्तेसुखंयांत्यमरावतीं एवंदृष्टंमयातत्रगतेनद्विजसत्तमाः ४१ पापंयच्चकृतंमर्त्यैचित्रगुप्तस्यवेश्मनि ।लिखंतिपूर्वक
र्माणिमर्त्यलोकेकृतानिवै ४२ शुभाशुभंचसकलमिहलोकेचयत्कृतं येतानिकर्माणिसर्वाणिज्ञात्वालिखतिवैततः
४३ शृणुध्वमपरंविप्रकथितंकर्मनारदेनारदउवाच पृच्छामित्वांमहाराजसूर्यपुत्रमहाबलः ४४ मार्तंडतेजसंकाशंश
रीरंतवशोभनं हेमादिभूषितंतद्रूपवांश्चमहाबलः ४४ ।किमर्थंतेमहाबाहोमुखंकृष्णांजनप्रभं धर्मराजउवाच महाव्रतध
राविप्राजितक्रोधाजितेंद्रियाः ४५ ।शिवभक्तास्तथाकेचिच्छिवमंत्रेरतादीक्षिताः पूजयंत्यतिथीन्नित्यंमहासत्यामहाव्रताः

२९ ४६ विष्णुध्यानपराः केचिद्द्विजभक्ताश्च धार्मिकाः पंचयज्ञस्य कर्तारः पूजयंत्यतिथीन्नित्यं महासत्या महाव्रताः विमानस्था
द्विजा नृपः तज्ज्वालातेजसा तेन दग्धमुखमिदं मम ४८ तेन नारद कुष्माभं शरीरं कवचरक्षितं ध मीत्मानः क्रतुभुजो नरा यांत्यमरा
वतीं ४९ तेपि साध्यास्तथा सम्यग्गत्वेम मम पुरे स्थिताः इत्थं श्रुत्वा मया तत्र संस्थितेन सभांतरे नारदेन समं धर्मो वाच्यमा
नः पुनः पुनः ५० वैशंपायन उवाच जन्मेजय नृपश्रेष्ठ इति पूर्वमनुष्ठितं नासिकेतेन सकलं भाषितं यद्द्विजैः सह ५
१ पुनश्चैव यथात्मानमभिवाद्य गताश्च ते नासिकेतस्ततो ज्ञानं गृहीत्वा मुक्तिमाप्नुयात् ५२ इदं ते कथितं गुह्यं नासि
केतकथामृतं यः शृणोति महाबाहो दृष्टं तेन सभासु च ५३ कृतेभ्यः सर्वपापेभ्यो मुच्यते नात्र संशयः दानं दत्तं यथा
संख्यं गोभूमितिलतंदुलाः ५४ चसाकान्नमाषंकं च मुस्तान्नं एवमेव च कार्यासं लवणं चैव घृतं तैलं तथापरं ५६
यद्दानं चैव हेतं लभंते कांचनीं पुरीं सर्वदेवेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं तत्फलं लभते सौ वै शृणु पार्थिवः कथा
मिमां ५७ गोसहस्रं कृतं दानं स्वर्णाभरणभूषितं तत्फलं लभते मर्त्यो श्रुत्वा पौराणिकीं कथां यानि कानि च पापा
नि ब्रह्महत्यासमानि च ५९ नासिकेतकथां श्रुत्वा विलयं यांति तान्यपि अपुत्रो लभते पुत्रान्बद्धो मुच्येत बंधना
त् ६० धर्मार्थी प्राप्नुयाद्धर्मं धनार्थी धनमाप्नुयात् नासिकेतस्य माहात्म्यं ये शृण्वंति पठंति वै सर्वपापविनिर्मुक्ता

नाके
२९

पांतिविघ्नाःपरांगतिं ६१ इति श्रीमहाभारते अहा अष्टादशसहस्त्रसंहितायांनासिकेतोपाख्यानेशुभाशुभकृतज
न्मान्वेषणोनामाष्टादशोऽध्यायः १८ शुभमभवतु ॥ कल्यानभवतु ॥ यःपोथीसहरवनारसदिवाकरछापारवा
नांमेनासिकेतकीकथाछपीसिवचरनकेइहासाकीनमोहल्लेभदेनीकालीमहलकेपास॥ वाःरामहरषपा
डे छापनेवालेवदल यहपोथीजिसकोलेनाहोयसोचादनीचौकमेकुंजगलीकेपछिमतरफसिवचरनके
दुकानपरमीलेगी। सम्वत १९३७ मीतीमाघसुदी १२ वारवृहस्पत ॥ ॥ ॥ ॥

[OrderDescription]
,CREATED=30.11.19 14:08
,TRANSFERRED=2019/11/30 at 14:16:55
,PAGES=59
,TYPE=STD
,NAME=S0002224
,Book Name=M-277-NASIKETOPAKHYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF

FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,